SAHITYAM

ACHARYA II YEAR
PAPER - VIII

# VYAKTIVIVEKA

(PRATAMA VIMARSA)

## PART - A

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha
Accredited at ‘A’ level by NAAC
Tirupati - 517 507 (A.P.)

## CHIEF EDITOR

## Vice-Chancellor

**GENERAL EDITOR**

Dr.Ch.P.Satyanarayana
Director, DDE

**PROGRAME CO-ORDINATOR**

Dr.Ch.P.Satyanarayana

**ADDITIONAL CO-ORDINATORS**

1. Dr.R.Deepta (Academic)
2. Sri.B.chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Prof.G.S.R. Krishna Murthy



**COURSE WRITER**

Dr.S.Srinivasulu



**DIRECTORATE OF DISTANCE EDUCATION**
**R.S.VIDYAPEETHA,**
**TIRUPATI.**

अयि प्रियान्तेवासिनः,

शुभाभिनन्दनानि,

स्वागतं भवतां राष्ट्रिय-संस्कृत-विद्यापीठान्तर्गते आराद्विद्या-निदेशक-निकेते। विद्यापीठमिदं राष्ट्रिय- मूल्याङ्कनपरिषदा(NAAC) ए + इति, विश्वविद्यालयानुदानायोगेन (UGC) पारम्परिक -शास्त्रीय -समुत्कर्ष केन्द्रमिति चोद्घोषितम् ।

निकेतोऽयं मातुः सरस्वत्याः आवासस्थानत्वेनाभिमतः यस्मिन् भवतामपि विद्यानन्दाह्लादः लभ्यते तराम् । संस्कृतवाङ्मयपाटवमभिलषतां भवताम् आधारशिला भवति भवतां श्रद्धैव। श्रद्धायाः प्रोत्साहनार्थम् अध्ययने रुचिमुत्पादयितुञ्च,इयं स्वाध्ययनसामग्री निर्मिता, याञ्च भवन्तः स्वयम् अधिगन्तुं शक्नुवन्ति।

श्रद्धावतः शिष्यस्य एकलव्यस्येव गुरूपदेशः 'आराद्' मनसि प्रविशति येन च शिष्यः सत्यकामो भवति। आचार्योऽपि श्रद्धावतः शिष्यान् आरादपि दृग्दीक्षाख्योपदेशेन समेधयति कूर्मः स्वापत्यानीव -

**स्वापत्यानि यथा कूर्मो वीक्षणेनैव पोषयेत् ।**

**दृग्दीक्षाख्योपदेशस्तु तादृशः कथितः प्रिये।। इति**

कुलार्णवागमाम्नातेन दृग्दीक्षाख्योपदेशोपायानुसारिणाचार्येण श्रद्धावान् शिष्यः सत्यकामं जाबालं गौतमः हारिद्रुमतः इव उद्धरिष्यति।

सत्यकामो जाबालः जबालां मातरमामन्त्रयामास। 'मातः ब्रह्मचर्यं गुरौ वत्स्यामि किं गोत्रोऽहमि' ति। सा चैनमुवाच। सा'हमेतन्नवेद यद्गोत्रस्त्वमसि। गुरुसमीपे सत्यकामो जाबालोऽहमस्मि भोः इति ब्रुवीथाः' इति। एवमेव जाबालः हारिद्रुमतं गौतमं गत्वा 'भवत्सु ब्रह्मचर्यं वत्स्यामी' ति प्रार्थयामास। तेन च गोत्रे पृष्टे मात्रा यदुक्तं तदेव प्रोवाच।

गौतमस्तुष्टः सत्यकामं सत्यवादिनमुपनीय चतुश्शतं गावः यूथात् पृथक्कृत्य शिष्याय दत्त्वोवाच -'यदा एताः चतुश्शतं गावः सहस्रं भवन्ति तदा भवान् गुरुकुलं प्रतिनिवर्तस्व' ।

अधुना चतुश्शतं गाः नीत्वा अरण्ये चारयतात् इति।

स एवमुक्तः सत्यकामः तृणोदकबहुलम् अरण्यं गाः प्रवेश्य बहुकालं पोषयामास। सम्यग्गावो रक्षिताः यदा सहस्रं सम्पन्ना बभूवुः तदा यूथस्थः कश्चन ऋषभः सत्यकाममाहूय 'सोम्य! वयमधुना सहस्रं सम्पन्नाः अस्मानाचार्यकुलं प्रापय' इत्यादिश्य 'ब्रह्मणश्च ते पादं

ब्रवाणी'ति स्वयमेव ब्रह्मज्ञानमुपदिशति।

एवम् अग्निः हंसः मद्गुः च सत्यकाममुपदिशन्ति इति आख्यायिका छान्दोग्योपनिषदि चतुर्थाध्याये आम्नाता वर्तते। इयमौपनिषदाख्यायिका आराद्विद्यया केन सादृश्येन सङ्गच्छत इति चेत् उच्यते -

अस्ति तावत् सत्यकामविद्याप्राप्तेः आराद्विद्या निकेततो विद्याप्राप्तेश्च महत् सादृश्यम् । तथाहि - सत्यकामः - गुरुकुलात् बहिरेव ब्रह्मविद्यामध्यगीष्ट अधिगमोऽपि मानवेतरमाध्यमेन। यतोऽहि ऋषभाग्निमद्गवादयः उपदेशकर्तारः । अन्ते गुरूपदेशः इति।

आराद्विद्याबोधनमपि विश्वविद्यालयात् दूरे बहिरेव भवति। बोधनसामग्र्यपि प्रवाचकभिन्नमेव मुद्रितपुस्तकसान्द्रमुद्रिकादीति, अन्ते किञ्चित्कालं साक्षादुपदेशः (Contact Programme) इति च।

अतस्सत्यकामवद्विद्यकामा भूत्वा कृतार्था भूयासुरिति धिया पृष्ठपत्रं जाबालोपाख्यानेन सचित्रितम् । अतोऽस्माकमवगत्यान्तरङ्गं श्रद्धया पाठ्यांशानामध्ययने रता भवन्तु।

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**

निदेशकः

# व्यक्तिविवेकः - प्रथमखण्डः

**संरचना**

१.० प्रस्तावना।

१.१.लक्षिताधिगमविशेषाः।

१.२ ध्वनि लक्षणे दशदोषाः।

१.२.१.अर्थे उपसजनीकृतात्मत्वनिवेशनखण्डनम्।

१.२.२. शब्दग्रहणस्य - शब्दे उपसर्जनीकृतार्थत्वस्य च खण्डनम्।

१.२.४. तदः पुलिङ्गनिर्देशानुपपत्तिः।

१.२.५. व्यङ्क्तः इत्यत्र द्विवचनानुपपत्तिः।

१.२.६. वा शब्द निर्देशानुपपत्तिः।

१.२.७. व्यक्तेः अनुपपत्तिः।

१.२.८. ध्वनिनाम्नः अनुपपत्तिः।

१.२.९. काव्यवैशिष्ट्यानुपपत्तिः।

१.२.१०. लक्षणकथनकर्तुनिर्देशानुपपत्तिः।

## १.०.प्रस्तावना

ध्वनिसाम्प्रदायस्य विवेचनं कुर्वता ध्वन्यालोककर्त्रा आनन्दवर्धनेन स्वग्रन्थस्यादौ ध्वन्याभाववादान्, भाक्तवादं, अनिर्वचनीयवादञ्च तिरस्कुर्वन् ध्वनेः लक्षणं प्राकाशयत् । 'यत्र अर्थः शब्दो वा उपसर्जनीकृतस्वार्थौ तमर्थं व्यङ्क्तः सः काव्यविशेषः ध्वनिः' इति ध्वनेः स्वरूपम्, यदेव काव्यं काव्यप्रकाशकारादिभिः 'उत्तमं काव्यमिति' रसगङ्गाधरकर्त्रा 'उत्तमोत्तमकाव्यमिति' व्यपदिष्टम् ।

आनन्दवर्धनेन प्रतिपादिते ध्वनिलक्षणे अरुचिं प्रकाशयन् तस्य खण्डने प्रवृत्तो महिमभट्टः तत्र दशदोषान् विवेचितवान् ।प्रथमांशे तान् '**दशदोषान्**' पश्यामः।

## १.१.लक्षिताधिगमविशेषाः

- आनन्दवर्धनस्य ध्वनिलक्षणं पर्यालोचयति।
- ध्वनिलक्षणेन सह उत्तमकाव्यस्य/उत्तमोत्तमकाव्यस्य तोलनं करिष्यति।
- उपसर्जनीकृतस्वार्थौ इति समासस्य विग्रहवाक्यं विलिख्य अर्थमवगच्छति।

**स्वानुशीलनप्रश्नाः**

१.उपसर्जनीकृतस्वार्थौ इत्यस्य समस्तपदस्य विग्रहः कः?

..........................................................................................

........................................................................................

## १.२.ध्वनिलक्षणे  दशदोषाः

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः सध्वनिरिति सूरिभिः कथितः'।।

इति ध्वनिकृता ध्वनिलक्षणं ध्वन्यालोके प्रत्यपादि। व्याख्यातं च **आनन्दवर्धनाचार्येण** --

'**यत्र अर्थः = वाच्यविशेषः, वाचकविशेषः = शब्दो वा तमर्थं व्यङ्क्तः, स काव्यविशेषः ध्वनिरिति**।' (ध्व.पृ.39)

**अयमाशयः** - पूर्वोक्तध्वनिलक्षणे अर्थपदस्य वाच्यविशेषः अर्थः। एवं शब्दपदस्य वाचकविशेषः इत्यर्थः। उपसर्जनीकृतस्वार्थौ इति समासस्य च विग्रहः एवमनुसन्धेयः। स्वं चासौ अर्थश्च स्वार्थः। स्वस्य अर्थः स्वार्थः। स्वार्थश्च स्वार्थश्च स्वार्थौ। उपसर्जनीकृतौ स्वार्थौ याभ्यान्तौ उपसर्जनीकृतस्वार्थौ कर्मधारयषष्ठीतत्पुरुषघटितः एकशेषः, ततः एकशेषघटितः बहुव्रीहिश्च अत्र अनुसन्धेयः। एतादृशविग्रहानुरोधेन च अर्थे  उपसर्जनीकृतस्वत्वं, शब्दे उपसर्जनीकृतार्थत्वञ्च लभ्यते। एवञ्च वाच्यार्थः आत्मानं उपसर्जनीकृत्य अथवा वाचकशब्दः स्वार्थमुपसर्जनीकृत्य यत्र लोकोत्तरचमत्कारकारणं अर्थं व्यञ्जनया बोधयति,सः काव्यविशेषः ध्वनिरिति सर्वविद्वत्सु अग्रताम्बूलाय अर्हद्भिः वैयाकरणैः ध्वनिरिति कथितः इति उपर्युक्त ध्वनिकारिकायाः अर्थः।

'**सुवर्णपुष्पां पृथिवीम्**' इत्यादि लक्षणामूलध्वनिस्थले '**सुवर्णपुष्पां पृथिवीं चिन्वन्तीति** वाच्यार्थस्य स्वयमनुपपन्नतया अनायासेन धनं साधयन्तीति' लक्ष्यार्थस्यैव लक्षणया प्रतिपादनात्, शूरादिगतप्राशस्त्यस्य च व्यञ्जनासाध्यत्वात्, शब्दस्य स्वार्थस्यैव अनुपपद्यमानत्वात्, तत्र अर्थस्य व्यञ्जकत्वं न सम्भवतीति शब्द एव उपसर्जनीकृतस्वार्थः अर्थान्तरमभिव्यनक्ति। एवं '**शिखरिणि क्व नु नाम कियच्चरम्**' इत्यादि विवक्षितान्यपरवाच्य ध्वन्युदाहरणे वाच्यार्थे निर्बाधं प्रतीतिपथम् अवतीर्णे, कामिनः प्रच्छन्नस्वाभिप्रायख्यापनात्मकविभावोन्मीलनस्य व्यङ्ग्यत्वात् तत्र च उपसर्जनीकृतात्मानः वाच्यार्थस्य प्राधान्येन, साहाय्यकारितया च शब्दस्य अर्थान्तराभिव्यक्तिक्षमत्वाच्च व्यञ्जकत्वं सिद्धम्। एवञ्च प्राधान्येन शब्दस्य व्यञ्जकत्वे अर्थः सहकारिभूतः। अर्थस्य व्यञ्जकत्वे तु शब्दः सहकारिभूतः इति ध्वनिकृतामभिप्रायः।

अनुमानसम्प्रदायप्रवर्तकः ''राजानक' महिमभट्टस्तु'' ध्वनिलक्षणेऽस्मिन् दशदोषान् एवं पर्यगणयत्।

**'अर्थस्य विशिष्टत्वं शब्दः सविशेषणस्तदः पुंस्त्वम्।**
**द्विवचनवाशब्दौ च, व्यक्तिर्ध्वनिर्नाम, काव्यवैशिष्ट्यम्'।।**
**वचनञ्च कथनकर्तुः कथिता ध्वनिलक्ष्मणीति दशदोषाः।। (व्यक्ति.पृ.110)**

ध्वनिं अनुमानेऽन्तर्भावयितुं प्रयतमानेन महिमभट्टेन अधोनिर्दिष्टरीत्या दशदोषान् प्रत्यपादयत्-

१. अर्थे उपसर्जनीकृतस्वत्वनिवेशनम्।

२. शब्दग्रहणम्।

३. शब्दस्य उपसर्जनीकृतार्थत्वम्।

४. तदः पुंलिङ्गनिर्देशानुपपत्तिः।

५. व्यङ्क्तः इत्यत्र द्विवचनानुपपत्तिः।

६. वा शब्दः।

७. व्यक्तिः (व्यञ्जना)।

८. ध्वनि संज्ञा।

९. काव्यवैशिष्ट्यम्।

१०. लक्षणकथनकर्तुः कथनम्।

इति दशदोषाः महिमभट्टेन आविष्कृताः।

## १.२.१. अर्थे उपसर्जनीकृतात्मत्वनिवेशनखण्डनम् :-

'अर्थो गुणीकृतात्मा ........ यत्र अर्थान्तनम् - अभिव्यनक्ति स ध्वनिः' (ध्व.पृ.४१) इति व्याचक्षाणेन आनन्दवर्धनेन अर्थे गुणीकृतात्मत्वविशेषणं दत्तमिति निरूपितम्। तन्न संगच्छते, अव्यभिचारात्। तथाहि - विशेषणं हि विशेषस्य तदा सम्भवति, यदा सम्भवव्यभिचारौ स्तः। '**सम्भवव्यभिचाराभ्यां स्यात् विशेषणमर्थवत्**' इति न्यायात्। न हि '**शीतोऽग्नि**रिति अग्नेः शैत्यस्य विशेषणता युज्यते असम्भवात्। एवमेव '**उष्णोऽग्निः**' इति अग्नेः औष्णस्यापि विशेषणत्वं न युक्तम्। अग्निसामान्यस्यैव अव्यभिचरितौष्ण्यत्त्वात्। (नियमेन औष्ण्यशालित्वात् अनुष्णस्य अग्नेरभावात्) अतश्च '**नीलं उत्पलम्**' इत्यत्र नीलस्यैव विशेषणत्वम् वक्तव्यम्। यतो हि निलोत्पले नैल्यस्य सम्भवः अस्ति। रक्तोत्पलादिषु नैल्यस्य व्यभिचारः (अभावः) अस्ति। अतश्च नीलस्य उत्पलविशेषणत्वं युज्यते। तथा अर्थस्य = वाच्यार्थस्य अर्थान्तरप्रतीत्यर्थम् उपात्तस्य अर्थान्तरंप्रति गुणभाव एवेति, अर्थे उपसर्जनीकृतात्मत्वं सदा अस्त्येव। यथा अग्न्यादिसिद्धौ उपादीयमानः धूमादिः गुणएव भवति। कदाचिदपि गुणतां नातिवर्तते, एवं अर्थान्तरप्रतीत्यर्थं वाच्यस्य उपसर्जनीभावव्यभिचार एवेति अर्थे उपसर्जनीकृतत्वं अव्यभिचारात् विशेषणं न भवितुमर्हति।

**स्वावलोकनप्रश्नाः**

१.शीतोऽग्निः इत्यत्र अग्नेः शीतत्वविशेषणं कुतो न सङ्गच्छते?

.........................................................................................

२.उष्णोऽग्निः इत्यत्र अग्नेः उष्णत्वविशेषणं कुतो न सङ्गच्छते?

.........................................................................................

३.शुक्ला गौः इत्यत्र गोः शुक्लत्वविशेषणं सङ्गच्छते वा कुतः?

.........................................................................................

ननु -

'उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागात् गलितं न लक्षितम्' ।।

इति समासोक्त्युदाहरणे -- 'उपोढरागेण चन्द्रेण निशामुखं तथा गृहीतं यथा निशया भ्रश्यमानं स्वीयमंशुकसदृशं तिमिरमपि न लक्षितम्' इति निशाशशिव्यवहारे वर्ण्यमाने तदेकचित्ततया नायकासक्तायाः, अत एव स्वमुखचुम्बनवेलायां भ्रश्यमानांशुकमपि अनुपलक्षयन्त्याः नायिकायाः वृत्तान्तः अप्रकृतः प्रतीयते। तत्र च निशाशशिनोरेव वाक्यार्थत्वात्, गम्यस्यापि अप्रकृतस्य नायिका-नायकव्यवहारस्य प्रकृत निशाशशिरूप वाच्यार्थोपस्कारत्वेन च, एतादृशस्थले वाच्यस्यैव प्राधान्यात्, व्यङ्ग्यस्य च अप्रधान्यात्, वाच्यार्थे उपसर्जनीकृतात्मत्वव्यभिचारः अस्त्येवेति अर्थे उपसर्जनीकृतस्वत्वस्य विशेषणत्वं युक्तमेवेति चेत्।

अत्रोच्यते - '**तदपेक्षया च तस्य लिङ्गत्वात् उपसर्जनीभावाव्यभिचार एव**' इति महिमभट्टेन उपरि आशङ्का समाहिता। वाच्यव्यङ्ग्योः मध्ये वाच्यार्थस्य निशाशशिव्यवहारस्य प्राकरणिकलक्षण प्राधान्यशालित्वेऽपि व्यङ्ग्ये नायिका-नायकाव्यवहारे व्यङ्ग्यत्वनिबन्धनं प्राधान्यं दुरपह्नवम्। यतो हि वाच्यव्यङ्ग्ययोः मध्ये वाच्यं व्यङ्ग्यस्य लिङ्गं भवति। लिङ्गस्य वाच्यस्य वह्न्यादिसिध्यर्थं उपात्तस्य धूमादेरिव उपसर्जनीभावाव्यभिचार एव। अतश्च अव्यभिचारात् अर्थे उपसर्जनीकृतात्मत्वं न युज्यते।

यदि वाच्यस्य प्रतीयमानापेक्षया चारुत्वं अस्तीति प्राधान्यसम्भावना क्रियते, एवमपि गुणीभूतव्यङ्ग्यकाव्ये व्यङ्ग्ये चारुत्वोत्कर्षस्य अग्रे महिमभट्टेन प्रतिपादयिष्यमाणत्वात्, वाच्यार्थे उपसर्जनीकृतात्मत्वव्यभिचारस्य कुत्राप्यलाभात्, अव्यभिचारात् अर्थस्य उपसर्जनीकृतात्मत्वं न विशेषणम्।

श्लो - **'उक्तं गुणीकृतात्मत्वं यदर्थस्य विशेषणम्।
गमकत्वात् न तत् तस्य युक्तमव्यभिचारतः' ।।**इति परिकरश्लोकेन।

**स्वावलोकनप्रश्नाः**

१.व्यङ्ग्यार्थप्रतीत्यर्थं उपात्तस्य अर्थस्य उपसर्जनीकृतात्मत्वं कुतो न भवति ?

..............................................................................

..............................................................................

२.उक्तं गुणीकृतात्मत्त्वं ............अव्यभिचारतः इति कारिकायाः अर्थं लिखत।

..............................................................................

..............................................................................

## १.२,३.शब्दग्रहणस्य, शब्दे उपसर्जनीकृतार्थत्वस्य च खण्डनम् :-

ध्वनिलक्षणे व्यक्तिक्रियाकर्तुतया शब्दः न उपदानं अर्हति। 'नहि शब्दस्य स्वार्थाभिधानमन्तरेण अन्यः कश्चित् व्यापारः अस्तीति ग्रन्थकारेण अग्रे निरूपयिष्यते।

१. शब्दो हि सङ्केतितमेव स्वार्थं बोधयितुं प्रभवति, न असङ्केतितमर्थम्। अन्यथा अस्य शब्दस्य अयमेव अर्थः इति व्यवस्थाभङ्गापत्तेः। सर्वेषां च सर्वार्थवाचकत्वप्रसङ्गात् च।

**स्वावलोकनप्रश्नाः**

१.अस्य शब्दस्य अयमेवार्थः इति व्यवस्थायाः अभावे को दोषः?

..............................................................................

..............................................................................

२. अग्नेः दाहकत्व प्रकाशकत्वयोरिव पौर्वापर्यानैरपेक्ष्येणैव शब्दात् स्वार्थस्य अर्थान्तरस्य च प्रतीत्यापत्तेः, शब्दस्य अर्थान्तरबोधकत्वसामर्थ्यं कल्पयितुं न शक्यते। यश्च अर्थः असङ्केतितः अस्माकं प्रतीतिपथं अवतीर्णो भवति, सः वाच्यार्थस्य अर्थान्तरेण सः साध्यसाधनभावसम्बन्धं पुरस्कृत्यैव प्रतीतो भवतीति अनुमानरूप अर्थनिष्ठव्यापारादेव अर्थान्तरावगतिः न लक्षणया, न वा तात्पर्यवृत्त्या, नापि व्यञ्जनया इति महिमभट्टस्य सिद्धान्तः। एवञ्च व्यक्तिक्रियाकर्तृत्वेन लक्षणे शब्दग्रहणं न युज्यते।

**स्वावलोकनप्रश्नाः**

१.असङ्केतितः अर्थः कं सम्बन्धं पुरस्कृत्य प्रतीतो भवति ?

..............................................................................

एवं शब्दे उपसर्जनीकृतार्थत्वदलदानमपि न युज्यते। असम्भवात्, अव्यभिचाराच्च। शब्दस्य च अनुकरणव्यतिरेकेण उपसर्जनीकृतार्थत्वं सम्भवति। तथाहि - अनुकरणं द्विविधम्-

१.निरर्थमनुकरणं २. सार्थकमनुकरणम् चेति तत्र '----- केलिकलितकुहकुहारावकान्तावनान्ताः' इत्यत्र कुहकुहादिः अनुकरणशब्दः। स च निरर्थकानुकरणरूपः। तत्र च अर्थस्य प्रसक्तिरेव नास्तीति कृत्वा उपसर्जनीकृतार्थत्वं न शब्दे सम्भवति। सार्थकानुकरणस्थलेऽपि इतिना व्यवच्छिन्नः शब्दः शब्दस्वरूपमेव बोधयति, न अर्थम् इति तत्र अर्थप्रसक्तेः एव अभावात्, न शब्दे उपसर्जनीकृतार्थत्वं सम्भवति। यथा - '**गवित्ययमाह**' इत्यत्र सार्थकानुकरणस्थले यद्यपि गो शब्दः '**सास्नादिमद्व्यक्तिविशेषबोधकः,** तथापि इतिना व्यवच्छिन्नत्वात् इति शब्दस्य च पदार्थविपर्यासकारित्वात् सास्नादिमद्व्यक्तिविशेषबोधकगोशब्दस्य केवलानुपूर्वीविशि-ष्टगोशब्दबोधकत्वमेव न अर्थबोधकत्वम्। एवञ्च -

'तं कर्णमूलमागत्य पलितच्छद्मना जरा।
कैकेयीशङ्कयेवाह **रामे श्रीर्न्यस्यतामिति**' ।।

इति पद्ये 'रामे श्रीर्न्यस्यताम्' इति इतिना व्यवच्छिन्नस्य अनुकरणशब्दस्य तादृश शब्दस्वरूपमात्रार्थबोधकतया व्यवहारगोचर-अर्थबोधकत्वाभावात् व्यवहारगोचरः तत्र अर्थ एव न सम्भवतीति, शब्दे उपसर्जनीकृतस्वार्थत्वं असम्भवि। अनुकरणशब्दात् भिन्नस्य अनुकार्यस्य तु उपसर्जनीभावाव्यभिचार एव। अर्थात् तस्य अनुकार्यशब्दस्यैव उपसर्जनीभावः, नैयत्येनास्ति। न तु तदर्थस्य शब्देन उपसर्जनीकरणम्। अतः अनुकार्यशब्दे उपसर्जनीकृतार्थत्वं न सम्भवतीत्यसम्भवो लक्षणदोषः। तस्य अनुकार्यशब्दस्य तदर्थमेव उपादानात्। यो हि यदर्थम् उपादीयते नासौ तमेव उपसर्जनीकरोति । यथा उदकाद्यर्थम् उपात्तो घटः उदकमेव नोपसर्जनीकरोति। योहि = घटः, यदर्थम् = उदकार्थम्, उपादीयतेउगृह्यते असौ घटः, तमेव = उदकमेव न उपसर्जनीकरोति। तद्वत् वाच्यप्रतीत्यर्थम् उपात्तः वाचकशब्दः वाच्यार्थमेव नोपसर्जनीकरोति। शब्दतदर्थयोः मध्ये अर्थप्रतीत्यर्थम् उपात्तस्य शब्दस्य अर्थं प्रति, उदकाद्यर्थमुपात्तस्य घटादिरेव अप्राधान्यत्वे, उदकादेरिव अर्थस्य च प्रधानत्वेन, शब्दे उपसर्जनीकृतार्थत्वं कदापि न सम्भवतीति असम्भवो लक्षणदोषः।

ननु दृष्टान्ते घटोदकयोर्मध्ये घटस्य अप्राधान्यं, उदकस्य प्राधान्यं कथमस्माभिः ज्ञेयम् इति चेत् - उच्यते, प्रातिनिध्यसद्भावात् घटादेः अप्राधान्यं, तदभावाच्च उदकस्य प्राधान्यम्। लोके उदकार्थिना उदकमेव पीयते न अन्नं भुज्यते। अतः अप्रतिनिधेयत्वात् उदकं प्रधानं उदकग्रहणार्थं घट- कमण्डलु-दृतिप्रभृतीनामनेकसाधनानाम् अनियतानाम् उपादीयमानत्वात् घटादेः अप्राधान्यम्। एवं वाच्यव्यङ्ग्ययोर्मध्ये वाच्यस्य अप्राधान्यं,व्यङ्ग्यस्य प्राधान्यं बोध्यम्।

अथ अर्थे उपसर्जनीकृतस्वत्व व्यङ्ग्योपस्कृतवाच्यप्राधान्यशालिनि समासोक्त्यादौ व्यभिचरितम्। तत्र व्यङ्ग्यापेक्षया तदुपस्कृतस्य वाच्यस्यैव प्राधान्यात् इति प्रथमदलोपयोगी व्यभिचारः सम्भवति। एवं समासोक्त्यादौ वाच्यस्य प्राधान्यात्, शब्दे उपसर्जनीकृतार्थत्वात्मक-द्वितीयदलोपयोगी व्यभिचारोऽपि सम्भवति। एवञ्च अनुकार्यशब्देऽपि अर्थस्य अर्थान्तरप्रतीतिदृष्ट्या उपसर्जनीकरणात्, शब्दे उपसर्जनीकृतस्वार्थत्वमपि सम्भवति इति चेत्, एतदपि न युज्यते। अर्थान्तर-अभिव्यक्त्यर्थमुपात्तयोः तयोः नान्तरीयकतयैव उपसर्जनीकृतार्थत्व उपसर्जनीकृतस्वत्त्वयोः सिद्धौ पुनः तयोः उपसर्जनीकृतस्वार्थविशेषणं व्यर्थम्। न च अर्थान्तराभिव्यक्तिसामर्थ्यसिद्धार्थस्य अनुवादकतयैव ध्वनिलक्षणे '**उपसर्जनीकृतस्वार्थौ**' इत्यनेन निवेशः इति वाच्यम्। स्वरूपमात्रानुवादकदलानां पुनरुक्तिप्रकारत्वस्य ग्रन्थकृता वक्ष्यमाणत्वात्।

**स्वावलोकनप्रश्नाः**

१.स्वरूपमात्रानुवादकस्य महिमभट्टेन कीदृक्त्वं प्रकट्यते?

.......................................................................................................

............................................   ..........................................................

न च '**सुवर्णपुष्पां पृथिवीम्**' इत्यादि लक्षणामूलध्वनिस्थले वाच्यार्थस्य स्वयमनुपपन्नत्वात्, तस्य अर्थान्तराभिव्यञ्जकत्वसामार्थ्यं नास्तीति शब्दस्यैव व्यञ्जनया अर्थान्तराभिव्यञ्जकत्वं स्वीक्रियते।

एवञ्च पूर्वोक्तस्थले शब्देन (अनुपपन्नं) वाच्यार्थं उपसर्जनीकृत्य,अर्थान्तर प्रकाशनात् शब्दे उपसर्जनीकृतस्वार्थत्वरूपविशेषणं सम्भवति एवेति वाच्यम्। लक्षणामूलध्वनिस्थले वाच्यार्थस्य अनुपपन्नत्वे अर्थान्तरप्रतीतौ सत्याम् अनुपपन्नवाच्यार्थस्य प्रतीयमान अर्थान्तरस्य च अनुमाप्य-अनुमापकाभावसम्बन्धस्य अथवा साध्यसाधनभावसम्बन्धस्य अज्ञानात् केवलं शब्दादेव अर्थान्तराभिव्यक्तिरिति भ्रमेण शब्दे उपसर्जनीकृतार्थत्वसम्भवभ्रमः। वस्तुतः शब्दे उपसर्जनीकृतार्थत्वं न सम्भवत्येव। एतद् अभिप्रायेणैव **`सुवर्णपुष्पां पृथिवीम्'** इत्याद्युदाहरणमुपदर्शितम्, तदसिद्धसाध्यसाधनधर्मानुगतमिति अवगन्तव्यम्'। (व्यक्ति.पृ.20) इति महिमभट्टेन उक्तम्।

**स्वावलोकनप्रश्नाः**

१.सुवर्णपुष्पां- इत्यत्र व्यञ्जनाव्यापाराङ्गीकारस्य भ्रमे कारणं किमिति व्यक्तिविवेककारः प्रतिपादयति ?

.......................................................................................................

प्रतिबन्दीयुक्त्या शब्दस्य तद्विशेषणस्य च खण्डनम् :-

किञ्चैवं सति यथा अर्थस्य उपसर्जनीकृतात्मत्वं विशेषणतया दत्तं, शब्दस्य च सविशेषणस्य उपादानं ध्वनिलक्षणे कृतं, एवं ध्वनिलक्षणे अभिधा, तस्याः विशेषणतया उपसर्जनीभावश्च वक्तव्ये। अन्यथा वाच्यसाधर्म्यशालिनि दीपके उपमालङ्कारस्य सादृश्य अभिव्यक्तौ ध्वनिलक्षणस्य अव्याप्त्यापत्तेः।

न च अत्र अलङ्कारात् अलङ्काराभिव्यक्तेः सङ्ग्रहाय लक्षणे अभिधायाः का वा परिगणनावश्यकता इति वाच्यम्। भङ्गीभणितविशेषरूपाणां अलङ्काराणां वाच्यवाचक-भावसम्बन्धस्वरूपत्वेन अभिधात्वस्यैव वक्तुं युक्तत्वात्। एवञ्च दीपकादौ उपमायाः व्यङ्ग्यत्वे वाच्यस्य दीपकस्य अभिधास्वरूपत्वेन उपसर्जनीभूतेन तेन सादृश्यस्य अभिव्यक्तेः, तत्र च उपसर्जनीकृतस्वार्थाभ्याम् अर्थशब्दाभ्याम् अर्थान्तराभिव्यक्तेरभावात्, एतादृशस्थले ध्वनिलक्षणसमन्वयाय अभिधाग्रहणं, तस्याः उपसर्जनीभावग्रहणं च अवश्यं कर्तव्यम्।

न च -

**'अलङ्कारन्तरस्यापि प्रतीतौ यत्र भासते।**
**तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः'** ।।

इति ध्वनिकारोक्तेः वाच्येन साधर्म्यात्मकेन दीपकेन उपमायाः व्यक्तावपि, तत्र दीपकस्य औपम्ये तात्पर्याभावात्, वाच्यस्य व्यङ्ग्यतत्परत्वेन ध्वनित्वं न ध्वनिकारसम्मतमिति वाच्यम्। दीपकादौ व्यङ्ग्यभूतायामुपमायां चारूत्वातिशयस्य सद्भावात्, चारूत्वातिशयस्याभावे तस्या व्यङ्ग्यत्वे मानाभावात् वाच्यातत्परत्वहेतुः असिद्धः। ततश्च ध्वनित्वाभावसाधकयुक्तेः वाच्यतत्परत्वस्य अभावात्, दीपकादौ व्यङ्ग्योपमायां ध्वनिलक्षणप्रवृत्यनुकूलतया अभिधाग्रहणं तस्याश्च उपसर्जनीभावग्रहणं कर्तव्यम्।

**स्वावलोकनप्रश्नाः**

१.वाच्यस्य(अलङ्कारस्य) अलङ्कारान्तरप्रतीतौ अपि ध्वनित्वव्यपदेशः कदा न भवति?

.............................................................................................................

.............................................................................................................

अथ शब्दात् अर्थप्रतीत्यन्यथानुपपत्या अभिधाव्यापारस्य सद्भावः लक्षणे अनुक्तोऽपि प्रतीयते। शब्दार्थयोः उपसर्जनीकृतस्वार्थत्वप्रतिपादनसामर्थ्यादेव अभिधायाः उपसर्जनीभावः लक्ष्यते इति दीपकव्यङ्ग्यायाः उपमायाः सङ्ग्रहसिद्धौ पुनः तत्सङ्ग्रहाय अभिधा – तदुपसर्जनीभावयोः लक्षणे निवेशः नापेक्षितः इति यद्युच्यते, एवं तर्हि प्रातिद्वन्द्व्येन अर्थे उपसर्जनीकृतस्वत्वाभिधानेनैव शब्दस्य तद्विशेषणस्य उपसर्जनीकृतार्थत्वस्य च, अभिधायाः तदुपसर्जनीभावस्येव सिद्धौ व्यर्थं शब्दोपादानं, तस्य उपसर्जनीकृतार्थत्वोपादानं च। न च शब्दस्य अर्थान्तरप्रतिपादना दृष्ट्या उपसर्जनीकृतार्थत्वमिति वाच्यम्। शब्दस्य अभिधातिरिक्त व्यापारान्तरानुपपत्तेः वक्ष्यमाणत्वात्, प्रत्युत,अर्थस्यैव व्यापारान्तरप्रतिपादनात्, अर्थान्तरबोधनदृष्ट्या शब्दे उपसर्जनीकृतार्थत्वं न युज्यते।

## ४. तदः पुंलिङ्गनिर्देशानुपपत्तिः.

'**यत्रार्थः शब्दो वा**' इत्यादिध्वनिलक्षणे '**तमर्थम्**' इति तच्छब्दस्य पुंलिङ्गनिर्देशः अनुपपन्नः। तच्छब्दस्य अनन्तर (सन्निहित) प्रक्रान्तार्थपरामर्शत्वात्, '**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्**' इति प्रतीयमानस्य नपुंसकलिङ्गविशिष्टत्वेन पूर्वं परामर्शात्, ततः अनन्तरं '**सरस्वती स्वादुतदर्थवस्तु**' इत्यादि षष्ठकारिकायामपि ध्वनिकारेण प्रतीयमानस्य क्लीबत्वविशिष्टत्वेन परामर्शात्, ध्वनिलक्षणेपि तस्यैव अर्थस्य पुनः परामर्शे क्रियमाणे तदर्थमिति नपुंसकलिङ्गेनैव पुनः परामर्शः कार्यः, न पुंलिङ्गेन इति, तमर्थमिति पुंलिङ्गनिर्देशस्य अनुपपत्तिः। न च ध्वनिलक्षणे पुलिंङ्गनिर्देशानुपपत्तिदोषवारणाय प्रागेव –

**'प्रतीयमानः पुनरन्य एव सोऽर्थोऽस्ति वाणीषु महाकवीनाम्।**

**योऽसौ प्रसिद्धावयवातिरिक्तश्चकास्ति लावण्यमिवाङ्गनासु' ।।**

'सरस्वती स्वादुतमं तमर्थं ..... (ध्व.पृ.३३) इति पाठविपर्यासे कृते (ध्व.पृ.११६) पुलिंङ्गनिर्देशः ध्वनिलक्षणे उपपन्न एवेति वाच्यम्। यदि पूर्वत्रैव पाठविपर्यासतः क्रियेत तर्हि पर्यायप्रक्रमभेददोषः प्रसज्येत। उभयत्र पाठविपर्यासस्य कर्तव्यत्वात्। यदि ध्वनिलक्षण एव पाठविपर्यासः क्रियेत तर्हि पूर्वोक्तस्थलद्वये पाठविपर्यासदोषः यद्यपि नास्ति, किन्तु ध्वनिलक्षणे पुंलिङ्गनिर्देशानुपपत्तिस्तु एक एव दोष इति, ध्वनिलक्षणे पुंलिङ्ग निर्देशानुपपत्ति दुर्द्धरा।

**स्वावलोकनप्रश्नाः**

१.तच्छब्दप्रयोगः कदा क्रियते?

....................................................................................

....................................................................................

२.पर्यायप्रक्रमभेदो नाम कः?

....................................................................................

....................................................................................

## ५. व्यङ्क्तः इत्यत्र द्विवचनानुपपत्तिः.

'**यत्रार्थश्शब्दो वा**' इत्यादि ध्वनिलक्षणे '**व्यङ्क्तः**' इत्यत्र द्विवचनं न युज्यते इति महिमभट्टस्याभिप्रायः। यद्यपि ध्वनिकारेण ध्वनिलक्षणनिरूपणानन्तरं अविवक्षितवाच्यध्वनि विवक्षितान्यपरवाच्यध्वन्योः उदाहृतत्वात्, तत्र च लक्षणामूलध्वनिस्थले अनुपपन्नार्थस्य शब्दस्य प्राधान्येन व्यञ्जकत्वात्, अर्थस्य तत्र सहकारित्वात्, एवं विवक्षितान्यपरवाच्यध्वनौ अर्थस्य प्राधान्येन व्यञ्जकत्वात्, विशिष्टार्थबोधनसमर्थस्य शब्दस्य व्यञ्जकत्वे सहकारित्वात् ध्वनिसामान्य एव शब्दार्थयोः उभयोरपि अभिव्यञ्जकत्वं अस्तीति ध्वनिकारानुयायिनां अभिनवगुप्तादीनां मतम्। ततश्च व्यक्तिक्रियाकर्तृत्वं शब्दार्थयोः उभयोः अपि अस्तीति व्यङ्क्तः इति द्विवचन निर्देशः उपपद्यते। न च शब्दार्थयोः द्वयोः अभिव्यक्तिक्रियाकर्तृत्वे व्यवस्थिते यत्रार्थश्शब्दो वेति विकल्पाभिधानं नैव युज्यते, समुच्चयस्यैव स्वीकारात् इति वाच्यम्। वाशब्द बोध्यस्य विकल्पस्य अभिव्यक्तिक्रियाकर्तृप्राधान्यगतविकल्पाभिप्रायेणैव स्वीकारात्, शब्दार्थान्तरगतत्वेन च अस्वीकारात् न लक्षणवाक्यवाच्यार्थे वा शब्दार्थो विकल्पत्वेन स्वीक्रियते। किन्तु लक्षणवाक्यजन्ये 'अर्थसहकृतः शब्दो वा, शब्दसहकृतः अर्थो वा यत्र अर्थान्तरं बोधयति' इति फलतः बोध एव लक्षणवाक्यघटक वाकारस्य अर्थः विकल्पः स्वीक्रियते। एवञ्च लक्षणवाक्यवाच्यार्थबोधे वाकारेण समुच्चयस्यैव स्वीकारात् विकल्पस्य च अस्वीकारात्, अभिव्यक्तिक्रियाकर्तृगतद्वित्वस्य निर्बाधं विवक्षणात् द्विवचनं यद्यपि उपपद्यते। अतश्च भट्टनायकेन कृतं द्विवचनदूषणं गजनिमीलिकैव इति वक्तुं शक्यत इति यदाहुः लोचनकाराः तत्सर्वं भ्रान्तिमूलम्।

व्यक्तिक्रियाकर्तृत्वेन शब्दार्थयोः उभयोः विवक्षा अस्ति चेदेव द्विवचन निर्देशस्य उपपत्तिः। अन्यथा तु न। प्रकृत्यर्थतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसम्बन्धेन द्वित्वविवक्षा यत्र तत्रैव द्विवचननिर्देशोपपत्तिः। प्रकृतौ अर्थतावच्छेदके शब्दत्व- अर्थत्वे यत्र (शब्दार्थयोः), तत्र अभिव्यक्तिक्रियाकर्तृत्वस्य सत्त्वे एव द्विवचनस्य उपपत्तिः। प्रकृते शब्दे अभिधातिरिक्तव्यापारस्य अस्वीकारात्, व्यञ्जकत्वलक्षणव्यापारस्य असम्भवात्, शब्दे अभिव्यक्तिक्रियाकर्तृत्वं नास्तीति द्विवचनं नैव युज्यते।

| **स्वावलोकनप्रश्नाः** |
| --- |
| १.शब्दे कीदृशी शक्तिः महिमभट्टेनाङ्गीक्रियते? |
| ..................................................................................................... |

अन्यच्च शब्दज्ञानानन्तरं अर्थस्मृतेः लोकप्रसिद्धत्वेन शब्दार्थयोः एककालिकत्वं नास्तीति तयोः भिन्नकालीनयोः युगपत् अभिव्यक्तिक्रियाकर्तृत्वेन निर्देशः न युज्यत, इत्यपि द्विवचननिर्देस्यानुपपत्तौ बीजम्। यदपि सर्वत्रापि ध्वनौ शब्दार्थयोः इतरेतरसहकारित्वं आस्थाय व्यक्तिक्रियाकर्तृत्वं सम्भवतीति द्विवचनस्य उपपत्तिः इत्युक्तम्, तदपि न समीचीनम्। लोके **'देवदत्तः यज्ञदत्तो वा गच्छति'** इति प्रयोगस्यैव दर्शनात्, **'देवदत्तः यज्ञदत्तो वा गच्छतः' इति प्रयोगस्यादर्शनात् 'शब्दविशिष्टः अर्थः' अर्थ विशिष्टः शब्दो वा व्यनक्ति** इत्यस्यैव प्रयोक्तव्यत्वात्, शब्दविशिष्टः अर्थः, अर्थविशिष्टः शब्दो वा व्यङ्क्तः इति द्विवचनप्रयोगः असाधुरेवेति महिमभट्टस्याशयः।

## ६. वा शब्दनिर्देशानुपपत्तिः.

| **स्वावलोकनप्रश्नाः** |
| --- |
| १.वा इति शब्दप्रयोगः कदा क्रियते? |
| ..................................................................................................... |
| ..................................................................................................... |

ध्वनिलक्षणे वाकारः किं विकल्पार्थः? आहोस्वित् समुच्चयार्थः? न तावत् विकल्पार्थः। विकल्पो हि नाम सम्भवतां पक्षानां अन्यतमपक्षपरिग्रहः अथवा सम्भवतोः पक्षयोः अन्यतरपक्षपरिग्रहः। प्रकृते शब्दस्य व्यापारान्तराभावप्रतिपादनात् शब्दस्य व्यक्तिपक्षः नोपपद्यत एवेति, एकस्यैव पक्षस्य शिष्टत्वात् विकल्पपक्षो न युज्यते। यदि च शब्देऽपि व्यञ्जकत्वपक्षसम्भवः तदापि द्विवचनानुपपत्तिः। समुच्चितयोरेव शब्दार्थयोः अभिव्यक्तिक्रियाकर्तृत्वे द्विवचनमुपपद्यते। विकल्पपक्षे च समुच्चयस्य अभावात् 'व्यङ्क्तः' इति द्विवचनम् अनुपपन्नमेव स्यात्। **'शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत्'** इत्यत्र परिमर्शकर्तृः श्व-काक-द्रुपदतनयत्वेन विकल्प्यमानतादशायां **'परिमृशेत्'** इति एकवचनस्यैव विवक्षा यथा, तद्वति विकल्पपक्षे **'व्यनक्ति'** इत्येव प्रयोगः स्यात् न तु **'व्यङ्क्तः'** इति द्विवचनप्रयोगः। अथ वाकारः समुच्चयार्थक इत्युच्येत, तर्हि यत्र शब्दार्थयोः एकस्य व्यञ्जकत्वं तत्र अभीष्टं ध्वनित्वं न स्यात्। तस्मात् समुच्चयपक्षोऽपि न शोभनः।

## ७. व्यक्तेः अनुपपत्तिः.

ध्वनि लक्षणे 'व्यङ्क्तः' इत्यत्र व्यक्ति निर्देशो नोपपद्यते। व्यक्तिः इत्युक्ते व्यञ्जनात्मकः व्यङ्ग्यव्यञ्जकभावलक्षणसम्बन्धः इति वक्तव्यम्। स च वाच्यप्रतीयमानयोः मुख्यवृत्या न सम्भवति। तथाहि - अभिव्यक्तिः सतः अर्थस्य अभिव्यक्तिः, असतः अर्थस्य अभिव्यक्तिरिति द्वेधा। तत्र अर्कालोकादिना

असतः इन्द्रचापस्य अभिव्यक्तौ असतो अभिव्यक्ति प्रकारः द्रष्टव्यः। एवं असतो अभिव्यक्तिः एकप्रकारैव सतः अभिव्यक्तिस्तु त्रिप्रकारा -

१.'दधि-क्षीर'न्यायेन ।

२. 'घट-प्रदीप'न्यायेन।

३. 'वह्नि-धूमादि'न्यायेन चेति।

तत्र अभिव्यक्तेः सामान्यलक्षणं तु इदम् - '**सम्बन्धस्मृतिनिरक्षेप प्रकाशककालीन सदसदन्यतरनिष्ठ प्रकाशविषयतापत्तिः अभिव्यक्तिः**' इति। तत्र दधिक्षीरन्यायेनाभिव्यक्तौ अभिव्यङ्ग्येन दध्ना सह क्षीरस्य सम्बन्धस्मृतिं विनैव प्रकाशकक्षीरकाले प्रकाशस्य सतो दध्नः प्रकाशविषयीभवनात् प्रथमाभिव्यक्तावभिव्यक्ति सामान्यलक्षणसमन्वयः। एवं अभिव्यङ्ग्येन घटेन सह अभिव्यञ्जकस्य प्रदीपस्य सम्बन्धस्मरणं विनैव प्रकाशप्रदीपकाले तस्य (घटस्य) प्रकाशविषयीभवनात् द्वितीयाभिव्यक्तावपि सामान्यलक्षणसमन्वयः। उभयत्रापि शब्दानुमानादाविव व्याप्त्यादि सम्बन्धस्मरणापेक्षा नास्ति। वह्निधूमन्यायेनाभिव्यक्तौ तु अभिव्यक्तिसामान्यलक्षणं ध्वनिकारादिभिः सम्भावितं पूर्वोक्तं न सम्भवति इति स्वयमेव महिमभट्टेन वक्ष्यते। तस्यैव अन्यथा परिष्कारे एव वह्निधूमादिन्यायेन अभिव्यक्तौ प्रवर्तते। तच्च परिष्कृतं तृतीयाभिव्यक्तिस्वरूपं तु वाच्यव्यङ्ग्ययोरपि सम्भवतीति, तच्च अनुमान एव पर्यवस्यतीति महिम्नः आशयः। एवं च तृतीयाभिव्यक्तौ अभिव्यक्तिसामान्यलक्षणस्य अप्रसारेऽपि न काचित् न्यूनता।

१. **दधिक्षीरन्यायेन अभिव्यक्तिः** :- कारणात्मनि कार्यस्य शक्त्या (सूक्ष्मरूपेण) अवस्थानात् तिरोभूतस्य इन्द्रियगोचरत्वापत्तिलक्षणः आविर्भावः एका अभिव्यक्तिः। तत्र कारणात्मनि= क्षीरात्मनि, कार्यस्य=दध्यादेः, शक्त्यात्मना अवस्थानात्=सूक्ष्मरूपेण अवस्थानात्, तिरोभूतस्य=अप्रकटितस्य दध्यादेः, इन्द्रियगोचरत्वापत्तिलक्षणः आविर्भावः एका अभिव्यक्तिः। तथा कारणात्मनि अवस्थानानभ्युपगमे वैशेषिकैः असत्कार्यवादात्मना उत्पत्तिरेव अभिव्यक्ति स्थाने अङ्गीक्रियते।

२. **घटप्रदीपन्यायेन अभिव्यक्तिः** :- तस्यैव आविर्भूतस्य कुतश्चित् प्रतिबन्धकवशात् अप्रकाशमानस्य उपसर्जनीकृतात्मना प्रकाशकेन सहैव प्रकाशः द्वितीयाभिव्यक्तिः। अभिव्यक्तो घटः आविर्भूतोऽपि कुतश्चित् प्रतिबन्धनात् तम आदेः अप्रकाशमानः अस्ति। तथा अप्रकाशमानस्य घटस्य उपसर्जनीकृतात्मना प्रदीपेन सहैव अभिव्यक्तेः घटप्रकाशके प्रदीपे द्वितीयाभिव्यक्तिलक्षणसमन्वयः। घटप्रदीपन्यायेन अभिव्यक्तेः स्वरूपञ्च प्राचीनैः एवं आविष्कृतम्।

**'स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।**
**यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्।।'**

प्रदीपो हि स्वावभासेन अन्यान् घटपटादीन् अवभासयति। अतः स्वज्ञानेन अन्यधीहेतुः भवति। कारकं दण्डादिकं, न हि स्वावभासेन अन्यावभासनसमर्थम्। अत एव कारकात् ज्ञापके विशेषः। ध्वनिकारेणापि 'स्वरूपं प्रकाशयन्नेव परार्थावभासको व्यञ्जक इत्युच्यते। यथा 'प्रदीपो

घटादेः' । इति एषा अभिव्यक्तिः प्रतिपादिता।

३. **वह्निधूमादिन्यायेन अभिव्यक्तिः** :- अनुभूतपूर्वस्य संस्कारात्मना अन्तर्विपरिर्वत्तिनः अर्थस्य कुतश्चित् अव्यभिचारिणः (नियतसम्बद्धात्) अर्थान्तरात्, संस्कारात्मना अन्तरर्विपर्वर्ति अर्थप्रतिपादकात् शब्दाद्वा संस्कारप्रबोधमात्रं यत्र क्रियते, तत्र तृतीयाभिव्यक्तिः। यथा महानसादौ अनुभूतपूर्वस्य संस्कारात्मना आत्मनि अवस्थितस्य वह्न्यादिसंस्कारस्य वह्न्यादिना नियतसम्बद्धात् धूमात् प्रबोधमात्रं अनुमानरूपायां अभिव्यक्तौ भवति। एवं पूर्वमनुभूतस्य गवादेरर्थस्य सम्बन्धी संस्कारः गवादिशब्देन प्रबोध्यते। एवं आलेख्य-पुस्तक-प्रतिबिम्ब-अनुकरणादिभ्यः तद्गतसंस्कारात्मकविषयप्रबोधः भवति इति एषा तृतीयाभिव्यक्तिः।

**स्वावलोकनप्रश्नाः**

१.दधि-क्षीरन्यायरूपा अभिव्यक्तिः कीदृशी?

...............................................................................

२.घट-प्रदीपन्यायरूपा अभिव्यक्तिः कीदृशी ?

...............................................................................

३.वह्नि-धूमादिन्यायरूपा अभिव्यक्तिः कीदृशी?

...............................................................................

आसु त्रिप्रकारासु अभिव्यक्तिषु आद्यं अभिव्यक्तिलक्षणद्वयं प्रतीयमानार्थव्यञ्जके वाच्ये न संगच्छते। यतो हि लोके लक्षणत्वेन व्यपदिश्यमानं स्वरूपसंस्पर्शि एव भवति, न स्वरूपासंस्पर्शि। प्रकृते दधिक्षीरन्यायेन अभिव्यक्तेः स्वीकारे क्षीरादभिव्यक्तस्य दध्न इव वाच्यार्थाभिव्यक्तस्य व्यङ्ग्यस्य इन्द्रियगोचरापत्तिः। घटप्रदीपन्यायेन अभिव्यक्तेः स्वीकारे तु प्रदीपसहभावेन घटस्य इदन्ताप्रतीतेरिव वाच्यार्थसहभावेन प्रतीयमानस्य इदन्ताप्रतीतप्रसङ्गः। तृतीयस्याः अभिव्यक्तेः तु यल्लक्षणं तत् अनुमानस्यैव सङ्गच्छते, न व्यक्तेः। पक्षसत्व-सपक्षसत्व-विपक्षासत्वरूप रूपत्रयविशिष्टात् लिङ्गात् यत् अनुमेयविषयकं ज्ञानं तत् अनुमानमेव। नहि लोके अर्थात् अर्थान्तरप्रतीतिः विना अनुमानं क्वापि सङ्गच्छते। गवयमजानतः पुरुषस्य 'अयं गवयपदवाच्यः' इत्युपमिति ज्ञानमपि गोसादृश्यज्ञानविषयत्वहेतुकानुमानेनैव भवतीति तस्या अपि अनुमितावेव अन्तर्भावः। उपमानमपि अनुमान एवान्तर्भूतम्। एवं पदार्थन्वयबोधरूप शाब्दबोधः आकाङ्क्षादिवत् पदकदम्बोपस्थापितत्वं हेतुमास्थाय भवतीति, शाब्दव्यवहारस्यापि अनुमितावेव अन्तर्भावः। नहि नान्तरीकत्व-अविनाभावादि शब्दशब्दितं व्याप्ति सम्बन्धज्ञानं विना कस्मादपि अर्थात् कस्यचित् अर्थान्तरस्य प्रतिपत्तिः भवतीति, सर्वापि अर्थान्तरप्रतिपत्तिः अनुमानादेव। तस्मात् प्रत्यक्षम् अनुमानम् इति द्वे एव प्रमाणे।

यद्यपि वह्नि धूमादिन्यायेन अभिव्यक्तेः प्रत्येकशः स्वरूपं महिमभट्टेन आविष्कृतम्। 'तस्यैव अनुभूत पूर्वस्य ......' इत्यादिना, किन्तु अभिव्यक्तिसामान्यलक्षणं अस्याम् अभिव्यक्तौ न प्रवर्तते। यतः अभिव्यक्तिसामान्यलक्षणे 'सम्बन्धस्मृति निरपेक्षत्वम्' इति एकं दलं दत्तम्। किन्तु अनुमानं व्याप्त्यादि सम्बन्धस्मृति सापेक्षतया एव प्रवर्तत इति, सम्बन्धस्मृति निरपेक्षत्वस्य अनुमानात्मकाभिव्यक्तौ असम्भवः। किञ्च '**प्रकाशकसहभावेन प्रकाश्यस्य प्रकाश- विषयीभवनम्'** इति सहभावघटितम् लक्षणं वह्निप्रकाशके धूमादौ न सम्भवति। यतः साधनप्रतीतिपूर्विका साध्यप्रतीतिः। न हि धूमज्ञानकाल एव अनुमित्यात्मकं वह्निविषयकं परोक्षज्ञानं जायते। तस्मात् प्रकाशकस्य लिङ्गज्ञानस्य प्रकाशस्य लिङ्गिनो ज्ञानस्य च सहभावो नास्तीति, सहभावघटितं अभिव्यक्तिसामान्यलक्षणम् वह्निप्रकाशकधूमादौ असम्भवदोषग्रस्तम्। न च रसादिप्रकाशकवाच्ये सहभावघटिताभिव्यक्तिलक्षणप्रसारात् नासम्भव इति वाच्यम्। एवमपि वस्तुप्रकाशके अलङ्कारप्रकाशके च वाच्ये, वाच्यप्रतीयमानयोः क्रमस्यैव लक्षणात् सहभावघटितव्यक्ति लक्षणस्य तत्राव्याप्तिः।

अन्यच्च प्रसिद्धवह्निधूमाद्यनुमाने सहभावघटितलक्षणस्य असम्भवदोषग्रस्तत्वेऽपि विभावादिप्रकाशक सहभावेन प्रकाश्यमानेषु रसादिषु विषये प्रकाशकसहभाव घटितमभिव्यक्तिलक्षणं सम्भवत्येवेति चेत्, एतदपि शशशृङ्गारचितमेव। यतः कारणैः कृत्रिमैः विभावाद्यैः प्रतीताः वस्तुतः असन्त एव प्रतिबिम्बकल्पा रत्यादयः हृदयसंवादाद्यास्वाद्यत्वं उपयन्तः रसा इत्युच्यन्ते। न च कारणैः विभावैः असन्तः प्रतिबिम्बकल्पाः रत्यादयः सहैव प्रकाश्यन्ते। तस्मात् सहभावघटिताभिव्यक्तिलक्षणस्य रसाद्यनुमानेऽपि असम्भव एव दोषः।

किञ्च त्रिविधस्यापि वस्तुत्वलङ्काररसरूपार्थस्य ध्वनिकारमतानुसारेण न प्रकाशकसहभावेन प्रकाश्यस्य प्रकाशविषयीभवनलक्षणाभिव्यक्तिः सम्भवति। यतः वस्त्वलङ्कारध्वन्योः संलक्ष्यक्रमत्वस्य स्वयं ध्वनिकारैः प्रतिपादनात्, प्रकाशकसहभाव घटित अभिव्यक्तिलक्षणस्य तत्र अव्याप्तिरेव। एवं -

' नहि विभावानुभावव्यभिचारिण एव रसा इति कस्यचिदवगमः। ततः एव तत्प्रतीत्यविनाभाविनी रसादीनां प्रतीतिरिति तत्प्रतीत्योः कार्यकारणभावेन अवस्थानात् क्रमोऽवश्यम्भावी। स तु लाघवान्न प्रकाशत इत्यलक्ष्यक्रमा एव सन्तो व्यङ्ग्या रसादयः इति'। (व्यक्तिलक्षण-८५)

**स्वावलोकन प्रश्नाः**

१.विभावादीनां रसानाञ्च कीदृशः सम्बन्धः?

..........................................................................................

..........................................................................................

इति कथयता च आनन्दवर्धनेन रसध्वनेः असंलक्ष्यक्रमत्वस्यैव प्रतिपादनात्, अक्रमत्वस्य च प्रतिपादनाभावात्, विभावादीनां रसादीनां च आनन्दवर्धनोक्तदिशापि वाच्यव्यङ्ग्यरसयोः मध्ये क्रमस्य सद्भावात् तन्मतानुसारेणापि प्रकाशकसहभाव घटितं व्यक्तिलक्षणं नोपपद्यते।

अत एतद्दोषभयात् सहभावानपेक्षं व्यक्तिलक्षणं प्रतिपाद्येत, तर्हि तस्य अनुमाने अतिव्याप्तिः। उपसर्जनीकृतात्मना केनचित् लिङ्गेन (धूमादिना) अर्थान्तरस्य (वह्नेः) प्रकाशविषयीभावस्यैव अभिव्यक्तिपदार्थत्वात्। अथ असद्ग्रहणेन व्यक्तिलक्षणस्य वह्न्यात्मकसदर्थप्रकाशकधूमादौ अतिव्याप्ति वारणं क्रियते, वह्नेः सत एव प्रकाशनात्, असतश्च प्रकाशाभावान्नातिव्याप्तिः इति यद्युच्यते, तर्हि घटकप्रकाशकप्रदीपे असद्प्रकाशकत्वस्य अभावात् अव्याप्तिः। अथ एतद्दोषभयात् सतः प्रकाशन एव अभिव्यक्तिः इति यदुच्यते अर्कालोकादिना क्रियमाणे असतः इन्द्रचापस्य अभिव्यक्तौ अव्याप्तिः। सदभिव्यक्तेः तत्र अभावात्। अथ अर्थात् अभिव्यक्तिलक्षणे सतः असतो वा ग्रहणं न करिष्यते इत्युक्तौ, एतल्लक्षणं अनुमानस्यैव पर्यवस्यति न व्यक्तेः। तच्च अस्माकम् इष्टमेव वाच्यप्रतीयमानयोः क्रमेणैव प्रकाशोपगमात्। तस्मात् निर्वचनानर्हव्यक्तिपदार्थघटितत्वेन लक्षणस्य असम्भवो दोषः।

अन्यच्च वाच्यार्थस्य व्यञ्जकत्वं यत्र तत्र ध्वनिरिति 'यत्र वाच्यविशेषार्थः ..... अर्थान्तरं व्यनक्ति' इति ध्वनिकृतैव स्वयमुक्तत्वात्, लक्षणवाक्यप्रविष्टार्थपदेन वाच्यार्थस्य ग्रहणे तस्य च व्यञ्जकत्वे ध्वनेर्लक्षणतया प्रतिपाद्यमाने, यत्र वाच्यात् अन्योर्थः प्रतीयते, तस्माच्च अन्योर्थः प्रतीयते, तत्र अभीष्टं ध्वनित्वं न स्यात्। एवञ्च '**एवं वादिनि देवर्षौ**' इत्यादि पद्ये लज्जया अभिलाष विप्रलम्भस्य स्फूर्तौ इष्टं ध्वनित्वं न स्यात्। तत्र वाच्यनिष्ठ व्यञ्जकत्वस्य अभावात्। एतद्दोषवारणाय अर्थपदेन वाच्यव्यङ्ग्योभयलक्षणः अर्थः गृह्येत। द्व्यन्तरित- त्र्यन्तरित- व्यङ्ग्यप्रतीतौ वाच्ये व्यञ्जकत्वस्य उपपत्तेः अतिव्याप्तिर्लक्षणदोषः प्रसज्येत इति व्यक्तेः अर्थे अनुपपत्तिः महिमभट्टेन निरूपिता।

## ८. ध्वनिनाम्नः अनुपपत्तिः

आनन्दवर्धनेन '**ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। व्यञ्जकत्वसाम्यात् ध्वनिरित्युक्तः**' इति कथयता ध्वनिपदव्यपदेशकरणे औचित्यं प्रतिपादितम्। घण्टानिर्ह्रादस्य ध्वन्यन्तरं प्रति इव स्फोटात्मकान्तर्वर्तिशब्दं प्रति अभिव्यञ्जकत्वात् वैयाकरणैः वर्णेषु ध्वनिरिति व्यवहारः कृतः। तन्मतानसारिभिः अन्यैरपि व्यञ्जकत्वसाम्यात् वाच्यं वाचकश्शब्दः तयोः शब्दार्थयोः व्यङ्ग्यव्यञ्जकभावलक्षणसम्बन्धः तदाश्रयभूतकाव्यञ्च ध्वनिरिति परिभाषितः। वस्तुतः महिमभट्टप्रतिपादितदिशा सहभावघटितस्य घटप्रदीपन्यायेन व्यञ्जकत्वस्य अनुपपत्तेः वाच्यव्यङ्ग्ययोः क्रममूलकस्य गम्यगमकभावस्यैव अभ्युपगमात्, ध्वनिपदव्यपदेशः न युक्तः। (व्यक्ति.पृ.६१)

## ९. काव्यवैशिष्ट्यानुपपत्तिः.

ध्वनिलक्षणे काव्यस्य विशिष्टत्वम् अनुपपन्नम्। काव्यमात्रे ध्वनित्वेन व्यपदेशस्य इष्टत्वात्। काव्यस्य च रसात्मकत्वोपगमात्। यतः स एव आह -

**'काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियागोत्थः शोकः श्लोकत्वमागतः।।'**

शोकस्य श्लोकत्वापत्तिकथनेन, श्लोकस्य श्लोकस्थायिक करुणरसस्य सारत्वेन प्रतीतौ

'काव्यसामान्यस्य रस एव आत्मा' इति पर्यवस्यति। रसस्य च निरतिशयसुखास्वादलक्षणत्वात् रसवति काव्ये विशेषः न सम्भवति। यदि रसो नास्ति, तर्हि तस्य काव्यतैव नास्ति कुतस्तस्य काव्यविशेष्यत्वम्। न हि महिमभट्टमतेन काव्यस्य गुणालङ्कारसंस्कृतशब्दार्थमात्रत्वं स्वरूपं अपि तु -

'कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यम्' इति तल्लक्षणम्। तच्च अभिनेयार्थं - अनभिनेयार्थत्वेन द्विविधम्। तत्र च अभिनीयार्थे व्युत्पाद्यजनस्य आधिक्यात् तदुपानयनाय सामग्र्याधिक्यम्। अभिनेयार्थे कव्ये तु व्युत्पाद्यजनस्य अल्पतया तदपनोदक सामग्र्या अपि स्वल्पत्वम्। उभयत्रापि आनन्दे तारतम्यं नास्ति। सुकुमारमतयः शास्त्रश्रवणविमुखाः सुखिनः राजप्रभृतयश्च काव्ये अधिकृताः। ये च अत्यन्तं जडमतयः तावता व्युत्पादयितुं न शक्याः, स्त्री नृत्य आतोद्यादि प्रसक्ताः, ते उभयेऽपि गुडजिह्विकया रसास्वादं दत्वा कटुक औषध पानादाविव प्रवर्तयितव्याः। अतश्च काव्ये रसात्मकत्वम् अवश्यं अभ्युपगन्तव्यम्। काव्यसामान्यं च रसवदेवेति, काव्यविशेषस्य असम्भवात् तत्र ध्वनिपद व्यपदेशोऽपि व्यर्थः।

अथ रसानां वैशिष्ट्ये तदात्मनः काव्यस्यापि वैशिष्ट्यं इति चेत् एतदपि न युक्तम्। एवं हि प्रतिनियतरसात्मन एव ध्वनित्वं नान्यस्य रसात्मनः, तत्र वैशिष्ट्याभावात्। एवञ्च एकतररसात्मकस्य काव्यविशेषत्वे अन्यतररसात्मकस्य काव्यविशेष्यत्वं नास्तीति तत्र ध्वनित्वं न स्यात् इति अव्याप्तिर्लक्षण दोषः। न च काव्यस्य वस्त्वलङ्कारादिभिः विशेष आधातुं शक्यः, तेषां विभावादिरूपतया रसाभिव्यक्तिहेतुत्वोपगमात्। न च व्यञ्जकानां वैचित्र्यात् व्यङ्ग्यस्य विशेषः अभ्युगन्तुं शक्यते। एवं सति व्यञ्जकानां शाबलेयादीनां वैचित्र्यात् व्यङ्ग्यस्य गोत्वस्यापि सामान्यस्य विशेषप्रसङ्गः। न च गौणरसादिशून्य काव्यापेक्षया मुख्यस्य काव्यविशेषत्वमिति वाच्यम्। ' **गौणमुख्ययोः मुख्ये कार्यं सम्प्रत्यय'** इति नियमात् गौणस्य अकाव्यत्वात्। मेघदूतादौ काव्य विशेषव्यपदेशस्तु अभिधेयार्थं विशेषसमारोपकृत एव न मुख्यः। एवञ्च काव्यगत वैशिष्ट्यस्य सर्वात्मनानुपपत्तौ केवलं ध्वनिपद व्यपदेश एव कृतो भवति, न किञ्चिदन्यत् तत्त्वं प्रकाशितं भवति। अथ यथा कथञ्चित् काव्यविशेषास्तित्वस्य उपपादनेऽपि अवाच्यवचनं लक्षणदोषः। तथा हि किमयं काव्यस्य विशेषः लक्षणसम्बन्धात् ज्ञायते? अथवा विशिष्टस्य लक्षणं प्रतिपाद्यते? न द्वितीयः '**योऽयमश्वारूढः स पुरुषोऽराजा'** इति पुरुषस्य राज्ञः अश्वारूढं विशेष एव लक्षणतया प्रतिपाद्यते। विशेषो हि लक्षणम्। यदा विशिष्टं भवति, तदा तल्लक्षणं विशिष्टमेवेति न पुनः तस्य लक्षणं वक्तव्यम् इति द्वितीयपक्षे अवाच्यवचनं दोषः। नापि प्रथमः लक्षणसम्बन्धात् एव काव्यस्य विशेषावगतौ अवगतस्य विशेषस्य पुनः लक्षणे काव्यविशेषपदेन निर्देशायोगात्। तस्मात् उभयथापि अवाच्यवचनं काव्यविशेषपदग्रहणे दोषः।

## १०. लक्षणकथनकर्तृनिर्देशानुपपत्तिः.

ध्वनिलक्षणे **'सूरिभिः कथितः'** इति लक्षणकथनकर्तृनिर्देशः कृतः। स च अयुक्तः। न हि पृथिवीलक्षणे कथ्यमाने लक्षणवाक्ये 'अन्नंभट्टेन **गन्धवती पृथिवी इत्युक्तम्'** इति पृथिवीलक्षणं केनापि प्रतिपाद्यते। तद्वदेवात्र सूरिभिः कर्तृकथनं न कर्तव्यम्। किञ्च किं सूरिभिः इत्यनेन कर्तृमात्रस्य विवक्षा क्रियते? आहोस्वित् कर्तृविशेषस्य? नाद्यः। क्रियायाः कर्त्रव्यभिचारात् क्रिययैव कर्तृसामान्यस्य आक्षेपात्। अथ कर्तृविशेषविवक्षापक्षोऽपि नोपपद्यते। तस्यापि क्रियाविशेषणैव आक्षेपलभ्यत्वात्। एवञ्च उभयथापि सूरिभिरिति लक्षणकथनकर्तृनिर्देशो नोपपद्यते।

एवं ध्वनिलक्षणे दशदोषान् निरूप्य महिमभट्टः अन्ते ध्वनेः लक्षणमेवं निरूपणीयमिति ,तच्च परार्थानुपाने एव अन्तर्भवतीति च न्यगादीत्। तद्यथा -

वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति।
सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता।। इति।।

**स्वावलोकन प्रश्नाः**

१.आनन्दवर्धनस्य ध्वनिलक्षणस्य,महिमभट्टस्य काव्यानुमितिलक्षणस्य च मध्ये साम्यं वैषम्यञ्च लिखत।

.................................................................................

**व्यक्तिविवेकः --- प्रथमखण्डप्रश्नाः :-**

१. ध्वनिलक्षणे दशदोषान् महिमभट्टदिशा दर्शयत।

(एतस्य समाधानलेखनसमये ध्वनिलक्षणं निरूप्य तत्रस्थान् दशदोषान् नामतो निर्दिश्य प्रथम,द्वितीय, तृतीय, पञ्चम, सप्तम, नवमदोषाणां खण्डनं संक्षिप्य - प्रतिज्ञामात्र लेखनेन वा - लेखनीयाः। अन्यदोषखण्डनं पुनः यथातथं संक्षिप्य वा लिखितुं शक्यते)

२. प्रथम,द्वितीय,तृतीय,पञ्चम,सप्तम,नवमदोषाणां खण्डनं पृथक् पृथक् प्रष्टुं शक्यते। तथा हि -

१. 'अर्थस्य तावदनुपसर्जनीकृतात्मत्वमनुपादेयमेव' -- व्याख्यात।

२. शब्दस्य उपसर्जनीकृतार्थत्वविशेषणं खण्डयत।

अथवा

'शब्दस्य च विशेषणमनुपादेयमेव स्यात् अर्थस्य विशिष्टत्वेनैव तदवगतिसिद्धेः' व्याख्यात।

३. ध्वनिलक्षणे व्यक्तेः अनुपपत्तिः दर्शयत।

४. ध्वनिलक्षणे काव्यवैशिष्ट्यानुपपत्तिं दर्शयत।

* * *

# व्यक्तिविवेकः - द्वितीयखण्डः

**संरचना**

२.०.प्रस्तावना
२.१.लक्षिताधिगमविशेषाः
२.२. सर्वस्य शाब्दस्य व्यवहारस्य अनुमानरूपता।
२.२. १. पदविभागः.
२.२. २. नायादीनां लक्षणानि.
२.२. ३. अर्थ द्वैविध्यम्.
२.२. ४. अनुमेयार्थं त्रैविध्यम्.
२.३. साध्यसाधनभावप्रकाराः.
२.४. अविनाभावसम्बन्धनिश्चायकानि प्रमाणानि.
२.५. वाच्यानुमेययोः मुख्यया वृत्त्या व्यङ्ग्यव्यञ्जकभावाभावः.
२.६. रत्यादीनां नैयत्येन सुखास्वादजनकत्वम्.
२.७. व्यङ्ग्यवस्तुव्यवधाने अकाव्यत्वम् ....
२.८. सर्वेषां नामपदानां क्रियैव एका प्रवृत्तिनिमित्तम्.
२.९. प्रयुज्यमानक्रियापेक्षणैव क्त्वा प्रत्ययस्य पूर्वकालिकत्वम्...

## २.०. प्रस्तावना

सङ्केतितार्थबोधिका साक्षात् अभिधा,मुख्यार्थबाधादिहेतुत्रयसहकारात् अमुख्यस्य, आरोपरूपस्यार्थबोधिका लक्षणा, अभिधादिव्यापारासु विरतासु प्रकरणादिसहकारात् स्फुरणरूपस्यार्थस्य बोधिका व्यञ्जना इति व्यापारत्रयं (शक्तित्रयं)शब्दस्य निरूपिताः आलङ्कारिकैः।

शब्दस्य अभिधातिरिक्तः अन्यो व्यापारः नास्तीति,व्यञ्जनाव्यापारस्य ततो निष्पन्नस्य व्यङ्यार्थस्य (ध्वनेः)खण्डनार्थं प्रवृत्तो महिमभट्टः प्रथमं आनन्दवर्धनेन प्रतिपादिते ध्वनिलक्षणे दशदोषान् निरूप्य तस्य अनादरणनीयत्त्वं  प्रत्यपादयत् । तदस्माभिः परिशीलितम् ।

सम्प्रति, स्वाभिप्रायस्य द्रढीकरणार्थं शब्दस्य अभिधाव्यापारातिरिक्तव्यापारराहित्यस्य प्रतिपादनानन्तरं,अभिधातिरिक्तः सर्वोऽपि अर्थः अनुमानव्यापारगम्यः इति, स च अनुमेयार्थ इति निरूपयितुं ग्रन्थं प्रारभते।-

## २.१.लक्षिताधिगमविशेषाः-

• द्वितीयांशपरिशीलनानन्तरं भवान् / छात्रः अधोनिर्दिष्टान् विषयान् अधिगन्तुं शक्नोति-

• अर्थप्रतीतौ अनुमानप्रमाणस्य उपयोगिता

• साध्यसाधनभावस्य स्वरूपमवगम्यते

• अविनाभावसम्बन्धस्वरूपावगमः-उदाहरणेषु योजनञ्च

• 'समानकर्तुकयोः पूर्वकाले' इति सूत्रार्थमनुश्रृत्य क्त्वा प्रत्ययं प्रयुज्य वाक्यानि लिखितुं शक्यन्ते।

• प्रयुज्यमानक्रिया-प्रतीयमानक्रिययोः कुत्र क्त्वा प्रत्ययस्य सम्भवः इति विवेचयितुं शक्नुवन्ति।

## २.२. सर्वस्य शाब्दस्य व्यावहारस्य अनुमानरुपता

महिमभट्टः स्वग्रन्थे प्रथमविमर्शे सर्वस्यापि शाब्दस्य व्यवहारस्य अनुमानान्तर्भावं विस्तृतग्रन्थेन निरूपितवान्। शाब्दः व्यवहारः सर्वोऽपि साध्यसाधनभावगर्भः। अत एव तस्य अनुमाने एव पर्यवसानम्। शाब्दव्यवहारस्य परप्रवृत्तिनिवृत्त्योः विषये एव अनुमानं कारणं भवति। तत्रापि सम्यक् ज्ञानात् प्रवृत्तिः मिथ्याज्ञानात् निवृत्तिश्च भवति। सम्यक् ज्ञनञ्च विना अनुमानं न सम्भवति। एवञ्च अनुमानादिशब्दितस्य शाब्दव्यवहारस्य सम्यक् मिथ्यान्यतरज्ञानद्वारा प्रवृत्तिनिवृत्तिहेतुत्वं सिद्धम्।

### २.२.१. पदविभागः :

शाब्दव्यवहारनिमित्तभूतः शब्दः द्विविधः पद-वाक्यभेदात्।




जाति-गुण- क्रिया- द्रव्याणां

तत्र पदं तावत् नाम-आख्यात-उपसर्ग-निपात-कर्मप्रवचनीय भेदात् पञ्चविधम्।नामादीनां लक्षणानि तत्र सत्त्वप्रधानानि नामानि इति नाम्नां लक्षणम्। सत्त्वं च सिद्धवस्तु। तत् प्रधानानि नामानि इत्यर्थः। तान्यपि बहुप्रकाराणि सम्भवन्ति, जाति-गुण-क्रिया-द्रव्याणां तत् प्रवृत्तिनिमित्तानां बहुत्वात्। तत्र '**घटः पटः**' इति जातिशब्दः। 'शुक्लो''नील' इति गुणशब्दः। '**पाचकः**' पाठक' इति क्रियाशब्दः '**दण्डी विषाणी**' इति द्रव्यशब्दः। एवं चतुष्टयी शब्दानां तत्तत् प्रवृत्तिनिमित्तं निरूप्यापि '**सर्वेषां नामपदानां क्रियैव एक प्रवृत्तिनिमित्तमिति**' सा च क्रिया तदात्मत्वापत्तिलक्षणा इति च विनूत्नं सिद्धान्तं निरूपितवान्।

### २.२.२. नामादीनां लक्षणानि :-

अस्तु प्रकृतमनुसरामः। एवं '**भावप्रधानमख्यातम्**' इति आख्यातस्य लक्षणम्। भावो नाम धात्वर्थः। तत् प्रधानम् आख्यातम् सर्वस्यापि वाक्यस्य क्रिययैव परिसमाप्तेः। क्रियावाचकधातूत्तरवर्तिनः आख्यातात्मकस्य प्रत्ययस्यापि अर्थस्य क्रियायामेव अन्वयात् आख्यातस्य भावप्रधानत्वम्। उपसर्गादयस्तु असत्वभूतार्थाः। अर्थात् असिद्धार्थबोधकाः। 'उपसर्ग- निपात-कर्मप्रवचनीयानान्तु असत्त्वभावार्थत्वम्' इति उपसर्गादीनां लक्षणम्, यतस्ते साध्यभूतक्रियागतविशेषं बोधयन्ति। अतस्ते असिद्धार्था एव, न सिद्धार्थकाः। एतेषांञ्च असिद्धार्थत्वाविशेषेऽपि व्यापारनियमात् प्रयोगनियमाच्च उपसर्ग-निपात-कर्मप्रवचनीयात्मना त्रैराश्योपगमः। तत्र क्रियाविशेषकत्वं उपसर्गाणां व्यापारः। निपातानान्तु चादीनां, ते यत्समभिव्याहृता तद्गतभेदप्रत्यायकत्वं व्यापारः। ते च चादयः निपाताः। क्वचित् सुबन्तोपस्थाप्ययोः, क्वचित् च तिङन्तोपस्थाप्ययोः अर्थयोः भेदस्य प्रत्ययकाः। तद्यथा देवदत्तश्च यज्ञदत्तश्च। यथा वा पचति पठति च। एवं अन्वादयः कर्मप्रवचनीयाः अपि क्रियाविशेषोपजनित कार्यकारणादि सम्बन्धनिर्णयहेतवः। तद्यथा - '**जपमनुप्रावर्षत्**' इत्यादौ ज्ञापकजपक्रियायाः ज्ञाप्य वर्षणक्रियायाश्च ज्ञाप्यज्ञापक लक्षणसम्बन्ध निर्णयहेतवः अन्वादयः कर्मप्रवचनीयाः भवन्ति। एवं व्यापारभेदात् उपसर्गादिषु त्रिषु पारस्परिको भेदः द्रष्टव्यः। एवं उपसर्गादिषु प्रयोगनियमः अपि पृथक् पृथक् अस्ति। तत्र उपसर्गाः 'ते प्राग्धातोः' इति प्राणिन्यानुशासनात् धातोः प्रागेव प्रयोक्तव्याः। चादीनां निपातानान्तु समुच्चेतव्यादिभ्यः परप्रयोगः नियमः। एवं कर्मप्रवचनीयानामपि यथायथं प्रयोगनियमः शास्त्रे दृष्टः।मतभेदेन पदविभागः वाक्यस्वरूपञ्च :-

**स्वावलोकनप्रश्नाः**

१.उपसर्ग-निपात-कर्मप्रवचनीयाः किं बोधयन्ति?

........................................................................................

२.उपसर्गादिषु त्रिषु पारस्परिकभेदं परिशील्य लिखत।

........................................................................................

एवं पदविभागं पञ्चधा केचित् कुर्वन्ति। निरुक्तकारास्तु कर्मप्रवचनीयान् निपातविशेषान् निपातेभ्यः पृथक् अविगणय्य चतुर्थैव पदविभागं मन्यन्ते। शाब्दिकास्तु सुप्तिङ्न्तभेदेन द्विधा पदं विभक्तवन्तः। एवञ्च पदं यथा स्वस्मिन् प्रकृतिप्रत्ययाद्यवयवकल्पनया विभक्तः, एवमेव वाक्येभ्यः पदानां अपोद्धरणेनउपृथक् ग्रहणेन पूर्वोक्तरीत्या विभक्तम्। तथाचोक्तम् -

'द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्' ।। इति (व्यक्ति. 46)

| **स्वावलोकनप्रश्नाः** | |
|---|---|
| १.पदविभागः कैः कैः कथं कृतः? | |
| ................................................................ | द्विधा |
| ................................................................ | चतुर्धा |
| ................................................................ | पञ्चधा |

वाक्यन्तु एकप्रकारमेव, क्रियाप्राधान्यात्। तस्याश्च क्रियायाः एकत्वात् वाक्यलक्षणं च कथयन्ति अभियुक्ताः '**मुख्यैकक्रियान्वय्यर्थोपस्थापकपदकदम्बकत्वं वाक्यत्वम्**' इति। वाक्यस्य लक्षणं सामान्यतः प्राचीनैरेवोक्तम्, यस्मात् पदानां खण्डने सति पदानां आकाङ्क्षा अस्ति, यत्र च मिलितैः अखण्डितैः पदैः किमपि नाकाङ्क्षते, यत्र च क्रियायाः प्राधान्यं भवति, यच्च गुणवत् अनेककारकवद् भवति, तत् एकार्थपदकदम्बकं वाक्यमित्युच्यते। यदाहुः -

'साकाङ्क्षावयवं भेदे परानाकाङ्क्षाशब्दकम्।
क्रियाप्रधानं गुणवदेकार्थं वाक्यमिष्यते।।' (व्यक्ति.पृ.४६)

**स्वावलोकनप्रश्नाः**

१.वाक्यलक्षणं स्ववचोभिः लिखत।

...............................................................................................

...............................................................................................

**२.२.३. अर्थद्वैविध्यम् :-**

एवं पदवाक्यस्वरूपे तद्विभागे च प्रकाशिते इदानीम् शाब्दव्यवहारे अङ्गभूतः अर्थः विज्ञेयः। अर्थोऽपि द्विविधः वाच्यः अनुमेयश्च। तत्र शब्दव्यापारविषयः वाच्यः। स एव मुख्यः इत्युच्यते। यस्य शब्दस्य श्रवणमात्रेण यः अर्थः अभिधया प्रतीयते सः मुख्यार्थः। शब्दात् अवगतस्य मुख्यार्थस्य बाधे तु मुख्यार्थादन्यस्य प्रत्येतव्यत्वात्, मुख्यार्थस्य सम्बन्धात् यः अन्यः अर्थः अनुमीयते सः यत्नोपपादितः अर्थः गौणार्थः।

'श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते।
तं मुख्यर्थं मन्यन्ते गौणं यत्नोपपादितम्।।' (व्यक्ति.पृ.४७)

**स्वावलोकनप्रश्नाः**

१.गौणार्थः कीदृशः

...............................................................................................

...............................................................................................

तत एव वाच्यात् अथवा तदनुमितात् लिङ्गभूतान् अर्थात् अर्थान्तरम् अनुमीयते सः अनुमेयः ।अनुमेयार्थ त्रैविध्यम् / अप्रसिद्धविधेयक वाक्यार्थस्य साद्ध्यसाधनगर्भत्वं अनुमानात्मकत्वम् च :-

**२.२.४.अमुमेयार्थश्च त्रिविधः** -- वस्तुमात्रं, अलङ्काराः, रसादयश्चेति। तत्र वस्त्वलङ्कारात्मकानुमेयौ वाच्यावपि सम्भवतः रसस्तु अनुमेय एव न वाच्यः। शाब्दव्यवहारे प्रविष्टः पदस्य अर्थोऽपि वाच्य एव, न अनुमेयः, पदार्थस्य निरंशत्वात् तत्र साध्यसाधनभावविभागस्य अयुक्तत्वात्। वाक्यार्थस्तु क्वचित् साध्यसाधनभावगर्भः। तत्र वाक्यार्थे वाच्यं अंशपरिकल्पनायां क्रियमाणायां प्रधानतया द्वौ भागौ स्तः। एकः अनुवाद्यांशः अपरः विधेयांशश्चेति। तत्र विधेयांशः अपि सिद्धः, साध्यश्चेति द्विविधः। तत्र च विधेयांशस्य सिद्धौ प्रसिद्धत्वात् उद्भटोक्तकाव्यहेतुन्यायेन उपपादनसापेक्षता नास्तीति उपपादनात्मकस्य अनुमानस्य न तत्र

प्रसक्तिः। यत्र तु विधेयांशस्य सिद्धता नास्ति, तत्र विधेयांशः अर्थान्तरन्यासन्यायेन साधनीयः इति कृत्वा अनुवाद्येन (पूर्वसिद्धेन धूमादिना) असिद्धः वह्न्यादिर्विधेयांशः साध्यते। अतश्च तत्र अनुवाद्यविधेयात्मके वाक्यार्थे अनुमानस्य आवश्यकता अस्त्येव। यत्र तु विधेयांशः पूर्वमेव सिद्धः तत्र उपपादनसापेक्षया नास्तीति अनुमानस्य आवश्यकता नास्ति। यथा -

**'अस्त्युरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।'**

अत्र उद्धेश्ये हिमालये विधेयभूतं भारतोत्तरदिक्भागास्तित्वं लोकप्रसिद्धम्। अतः विधेयस्य अस्तित्वस्य उपपादनानपेक्षत्वात् तत्र अनुमानस्य आवश्यकता नास्त्येव। विधेयाप्रसिद्धौ तु विधेयस्य उपपादनसापेक्षत्वात् अनुमानावश्यकता अस्तीति पूर्वोक्तमेव। साध्यसाधनभावश्च अविनाभावसम्बन्धनिश्चयात् भवति।

स च अविनाभावसम्बन्धनिश्चयः क्वचित् (१)लोकात् क्वचित् (२)वेदात् क्वचित् (३)मानसप्रत्यक्षात्मक- प्रमाणाच्च भवति। एतेषाम् उदाहरणानि पश्चात् वितनिष्यन्ते।

**स्वावलोकनप्रश्नाः**

१.साध्यसाधनभावप्रकारः कथं साध्यते?

.............................................................................

.............................................................................

साध्यसाधनभावप्रकाराः तेषाम् उदाहरणानि च :-

**साध्यसाधनभावः बहुधा वेदितव्यः, इत्यत्र बहुधा इति इत्यत्र कथं विभागः क्रियते-**

**साध्यसाधनभावाः**



अविनाभावसम्बन्धनिश्चयेन साध्यसाधनभावः ग्राह्य इत्युक्तम्। स च साध्यसाधनभावः द्विविधः - शाब्दः आर्थश्च। द्विविधोऽपि साध्यसाधनभावः साध्यसाधनयोः प्रत्येकं पदार्थरूपत्वेन, वाक्यार्थरूपत्वेन, पदार्थस्य च जाति-गुण-क्रिया-द्रव्य भेदेन धर्मधर्मितया, धर्मस्यापि सामानाधिकरण्य-वैय्यधिकरण्याभ्यां भेदेन वाक्यार्थस्य च क्रियात्मकस्य कारकवैचित्रियेण वैचित्र्यात्, साध्यसाधनभावः बहुविधो वेदितव्यः। परं दिङ्मात्रं साध्यसाधनभावसम्बन्धज्ञानाय ग्रन्थकृता एवमुदाहरणानि प्रदर्शितानि। तत्र शाब्दः साध्यसाधनभावो यथा -

प्रजानां विनयादानाद्रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।। (व्यक्ति.पृ.55)

अत्र 'दिलीपः प्रजानां पिता' इति दिलीपे पितृत्त्वं साध्यं, तत्र च साधनत्रयं उपदिष्टम्। (I) प्रजानां विनयाधानम् (II) रक्षणम् (III) भरणम् चेति। एतेषां च साधनानां साधनत्वबोधक पञ्चम्यन्तैः 'विनयाधानात्' इत्यादिभिः शब्दतः प्रतिपादनात् शाब्दस्साध्यसाधनभावः, तत्रापि विनायाधान-रक्षण-भरणरूपाणां धर्मत्वेनावस्थितानाम् अत्र साधनत्वम्। आर्थः साध्यसाधनभावो यथा -

'द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरस्तु मृष्यते।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः।।'

अत्र '**द्विषतामुदयः** सुमर्षणः अस्वन्तरत्वात्' इति पञ्चम्यन्तसाधनघटितत्वेन अनिर्दिश्य **'अस्वन्ततरः'** इति प्रथमान्तेनैव साधनस्य निर्देशात्, साधनत्वस्य शब्देन अनवगतेः आर्थस्साध्यसाधनभावः। एवं अस्मिन्नेव पद्ये उत्तरार्थे '**महानपि परिक्षयः दुर्मर्षणः फलसम्पत् प्रवणत्वात्**' इति साधनत्वं शब्दतः अनुपादाय, फलसम्पत् प्रवणः इत्यनेन अर्थतः शत्रुपरिक्षयगतमर्षणीयत्वाभावं प्रति साधनत्वस्य प्रतिपादनात् आर्थस्साध्यसाधनभावः। अस्वन्तर -- मर्षणीयत्वयोः द्विषदुदयरूपैकाधिकरणगतत्वेन धर्मस्य समानाधिकरणस्य उपादाने आर्थस्य साध्यसाधनभावस्य इदमुदाहरणम्।

**स्वावलोकनप्रश्नाः**

१.द्विषतामुदयः इत्यत्र साध्यसाधनभावस्य आर्थत्वं विशदयत।

...............................................................................

पदार्थमात्रस्य धर्मधर्मिभावो शाब्दः साध्यसाधनभावा। यथा -

'दुर्मन्त्रानृपतिर्विनश्यति यतिः सङ्गात् सुतो लालना
द्विप्रोऽनध्ययनात् कुलं कृतनयाच्छीलं खलोपासनात्।
ह्रीर्मद्यादनवेक्षणादापि कृषिः स्नेहः प्रवासाश्रया
न्मैत्री चाप्रणयात् समृद्धिरनयात् त्यागात् प्रमादाद्धनम्।।'

अत्र 'दुर्मन्त्रान्नृपतिर्विनश्यति' इत्यत्र नृपनिष्ठ विनाशरूपधर्मं प्रति दुर्मन्त्रस्य पदार्थभूतस्य पञ्चम्यन्तशब्देन साधनत्वस्य प्रतिपादनात् पदार्थगतः शाब्दः साधनभावः। नृपतिदुर्मन्त्रयोः धर्मधर्मिभावोऽपि अस्ति।

एवं वाक्यार्थविषयेऽपि शाब्दत्वार्थत्व भेदाभ्यां साध्यसाधनभावस्य द्वैविध्यम्। तत्र शाब्दो यथा -

'सरस्यामेतस्यामुदरबलिवीचीविलुलितं
यथा लावण्याम्भो जघनपुलिनोल्लङ्घनपरम्।
यथा लक्ष्यश्चार्थं चलनयनमीनव्यतिकर
स्तथा मन्ये मग्नः प्रकटकुचकुम्भस्स्मरगजः'।।

अत्र 'प्रकटकुचकुम्भः स्मरगजः अस्यां सरस्यां मग्नः' इति साध्यवाक्यार्थं प्रति उदरवलिवीचीविलुलितं जघन-पुलिनोल्लङ्घनपरं लावण्याम्भः अत्र सरस्यां अस्ति। चलनयनमीनव्यतिकरश्च अत्र अस्तीति वाक्यार्थायोः साधनत्वेन प्रतिपादनात् वाक्यार्थयोस्साध्य साधनभावस्य च 'यथा''तथा' शब्दाभ्यां प्रतिपादनात् शाब्दः वाक्यार्थं विषयः साध्यसाधनभावः। आर्थः वाक्यार्थविषयः साध्यसाधनभावः। यथा -

**'निवार्यतामालि! किमप्यसौ वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।**
**न केवलं यो महतोऽपभाषते श्रुणोति तस्मादपि यः स पापभाक्।।'**

यथा च -

'दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः।
अर्थापयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत्।।' इति।

अत्र '**निवार्यतामालि**' **इति प्रथमपद्ये 'पुनर्विवक्षुः असौ वटुः निवारणीयः**' इति वाक्यार्थे साध्ये '**पापप्रयोजकास्मत् कर्तृकमहात्मदूषणकर्मकश्रवणहेतुत्वात्**' इति अर्थतः सिद्धस्य वाक्यार्थरूपस्य हेतोः सद्भावात् प्रथमपद्यं आर्थस्य वाक्यार्थविषयक साद्साधनभावस्योदाहरणम्। एवं '**दिवं यदि प्रार्थयसे**' इत्यादि प्रथमचरणे कारणविरुद्धोपलब्ध्या उपलभ्यमानविरुद्धव्याप्यस्य अभावः साध्यते। अत्र प्रार्थनीयगतं प्रार्थनीयत्वं प्रति कारणं दूरत्वं परायत्तत्वञ्च। तद्विरुद्धं निकटत्वं स्वायत्तत्वं च। तस्य उपलब्धेः 'पितुः प्रदेशाः तव देव भूमयः' इत्यनेन अर्थतः प्रतिपादनात्, उपलभ्यमान निकटत्त्वस्वायत्तत्वविरुद्धयोः,
परायत्तत्त्वदूरवर्तित्वयोः कार्यस्य प्रार्थनीयत्त्वस्य अभावः कारणोपलब्धिलिङ्गक अनुमानेनैव सिध्यति। अत्र च आर्थः वाक्यार्थविषयः साध्यसाधनभावः। अनुमेयार्थ विषयकसाध्यसाधन-भावस्य उदाहरणन्तु -

**सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।। (व्यक्ति. पृ.५७)। इति।।**

अत्र 'शूर सूरि सेवन चतुराः सुलभसम्पत्समन्विताः सुवर्णपुष्पपृथिवीकर्मक चयन-कर्तृत्वात्' इत्यनुमानेन '**शूरादीनां सर्वत्र सुलभाः विभूतयः**' इत्यर्थः सिध्यतीति अनुमेयार्थविषयक साध्यसाधनभावस्य इदमुदाहरणम्।

**स्वावलोकनप्रश्नाः**

१.निवार्यतामालि इति उदाहरणे सुवर्णपुष्पां इत्युदाहरणे च साध्यसाधनभावे कीदृशः भेदः

..............................................................................................

..............................................................................................

एवं क्वचित् अनुमित अनुमेयार्थविषयोऽपि साध्यसाधनभावः दृश्यते। यथा -

'पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।

सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान।।'

अत्र नखरञ्जनान्तरं परिहासपूर्वकं सख्या कृताशिषः देव्याः यदेतत् वचनं माल्येन ताडनं तत् अनुभावात्मना पार्वतीगतं कौतुक-औत्सुक्य प्रहर्ष-लज्जादि व्यभिचारभावसम्पदं अनुमापयति। सा च व्यभिचारि- भावसम्पत् भगवति भवे रतिमनुमापयति। एवं -

**'एवं वादिनि देवर्षो पार्श्वे पितुरधोमुखी।**

**लीलाकमलपत्राणि गणयामास पार्वती।।'**

अत्र देवर्षेः परमेश्वरविवाहप्रसङ्गकारित्वं पितुस्तु पार्श्ववर्त्तित्वम् इति द्वौ विभावौ। अधोमुखत्वं लीलाकमलपत्रगणनं च अनुभावभूतौ। ताभ्यां लज्जाख्यः सञ्चारी भावः अनुमीयते। सोऽपि भावः पार्वतीनिष्ठां परमेश्वरविषयिणीं रतिं अनुमापयति।

**स्वावलोकनप्रश्नाः**

१.'सुवर्णपुष्पां' इत्युदाहरणे 'एवं वादिनि देवर्षौ' इत्युदाहरणे च साध्यसाधनभावे कीदृशः भेदः

..............................................................................................

..............................................................................................

एवं सर्वस्यापि वाक्यार्थविषयस्य साध्यसाधनभावस्य क्रमभावः अस्ति। अनुमेय वस्त्वलङ्कारयोः वाच्यस्य च विषये क्रमभावः स्फुट एव। रसविषये वाच्यव्यङ्ग्ययोः गम्यगमकभावः यद्यपि व्यङ्ग्यव्यञ्जकभाव नाम्ना ध्वनिकारादिभिः व्यवहृतः। परं तथा व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य अभ्युपगमः तन्निबन्धनः काव्यस्य ध्वनित्व व्यपदेशश्च सर्वोऽपि औपचारिक एव न मुख्यः। रसादीनां वाच्यस्य च घटप्रदीपयोरिव मुख्यसहभावभावात्।।

केवलं रसादिवाच्ययोः सहभावस्य औपचारिकत्वात्। तथा उपचारस्य किं वा प्रयोजनमित्युक्ते सचेतनचमत्कारित्वमेव प्रयोजनम्। कथं च साध्यसाधनभावे व्यङ्ग्यव्यञ्जक भावस्यारोपमात्रेण चमत्कारः? इत्युक्ते - यथा चित्रपुस्तकादौ सत्यपि अभिव्यञ्जकस्य तत्तत् वर्णस्य अभिव्यङ्ग्यानाम् अश्वादीनाम् एककालमिव भाने यथा सद्यः कोऽपि चित्तस्योत्फुल्लता जायते, एवमेव साध्यसाधनयोः

व्यङ्ग्यव्यञ्जकत्वारोपेण एककालमिव भाने चमत्कृति र्जायते। सापि भ्रान्तिमूला चमत्कृतिः असंलक्ष्यक्रमे रसाद्यनुमेय एव भाति न तु अनुमेययोः वस्त्वलङ्कारयोः।

तदेवं वाच्यप्रतीयमानयोः लिङ्गलिङ्गिभावस्य समर्थनात् सर्वस्यैव ध्वनेः अनुमानन्तर्भावः समन्वितः भवति। अनुमानस्य च ध्वन्यतिरिक्ते पर्यायोक्तादौ, गुणीभूतव्यङ्ग्यादौ च सञ्चारस्वीकारेण महाविषयत्वात् ध्वनेरेवानुमाने अन्तर्भावो युक्तः। सर्वत्र वाच्यप्रतीयमानयोः लिङ्गलिङ्गिभावः अस्तीति तत्त्वमजानन्तः केवलं त्रिरूपलिङ्काख्यानं परार्थानुमानमिति तदन्यः व्यङ्ग्यव्यञ्जक भावध्वनेः विषयः इति बभूवुः। वस्तुतः सर्वेऽपि शाब्दव्यवहारः अनुमानस्यैव विषयः।

अथ यदि सर्वः शाब्दव्यवहारः साध्यसाधनभावगर्भ इत्युच्यते तर्हि साध्यसाधनयोरिव दृष्टान्तस्यापि नियमेनोपदानं सर्वत्र शाब्दव्यवहारे कर्तव्यम्, व्याप्तिसाधनप्रमाणविषयतया दृष्टान्तस्यापि अवश्यापेक्षणीयत्वात् इति चेत् - अत्रोच्यते। यत्र प्रसिद्धं साध्यसाधनमुपादीयेत तत्र तादृश प्रसिद्धसाधनबलादेव व्याप्तिनिश्चय इति दृष्टान्तस्यापेक्षा नास्ति। केवलं दृष्टान्तः साध्यसाधनावमजानतः पुरुषस्य साध्यसाधनभावं ज्ञापयितुमेव उपयुज्यते। तथाचोक्तम् -

तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः।
ख्याप्येते विदुषां वाच्यो हेतुरेव च केवलः।। इति।। (व्यक्ति.पृ.69)

ननु सर्व एव शाब्दव्यवहारः साध्यसाधनभावगर्भः, काव्यात् विभावादिभ्यः जायमाना प्रतिबिम्बात्मक रत्यादिप्रतीतिः अनुमेयभूता असत्यैवेति कथमनुमेयार्थस्य पुरुषार्थानुबन्धितं इति चेत् –- अत्र महिमभट्टस्य द्विविधं समाधानम्।

१. प्रतीतिपरमार्थं काव्यादि प्रतीतिमात्रेणैव विनेयेषु विधिनिषेधव्युत्पत्तिमाधदात्। अतः रत्यादीनां सत्यत्वासत्यत्ववार्तया न काचित् हानिः।
२. किञ्च अनुमेयप्रतिबिम्बकल्प रत्यादेः भ्रमत्वेन भ्रान्तः अपि अंशतः प्रमात्वात्। वस्तुतः मणिशिखां मणिबुध्या धावतोऽपि मणिप्राप्तिरूपार्थक्रियायाः दर्शनात् भ्रान्तेः अंशतः प्रमात्वं अस्त्येवेति न कश्चित् दोषः।

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति।। इति।।

साध्यसाधनभावश्च अनयोः अविनाभावावसायकृतो अवगम्यः इति महिमभट्टेन उक्तम्। तत्र अविनाभावसम्बन्धनिश्चायकानि कानि प्रमाणानि इति इदानीं निरूप्यते।

III. अविनाभावसम्बन्धनिश्चायकानि प्रमाणानि :-

‘लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम् इति त्रीणि प्रमाणानि।

१. लोकः :- लोकप्रसिद्धार्थ विषयः लोकः। यथा -

कयासि कामिन् सरसापराधः पादानतः कोपनयावधूतः।
यस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम्।। इति।।     व्यक्ति.पृ.52)

अत्र नायककर्तृत पादानतेः नायिकाकर्तृका अवधूतेश्च कार्यकारणभावः लोकप्रसिद्धः यन्मूलश्च तयोः साध्यसाधनभावः। अतएव नायकस्य पादानतिमात्रेण किं नायिकया तिरस्कारः कर्तव्यः इति तयोः लोकसिद्ध साध्यसाधनभावविषये प्रश्नो न कर्तव्यः। एतादृशस्थलेषु लोकसिद्धः कार्यकारणभावः अस्तीति अजानन्त एव केचित् सर्वस्यापि शाब्दव्यापारस्यानुमानान्तर्भावो न भवतीति भ्रान्ताः आसन्। एवं सरसापराध-कोपनाकर्तृकावधूतत्योरपि कार्यकारणभावः लोकसिद्धः ग्राह्यः। यथा वा -

चन्द्रं गता पद्मगुणान् न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम्।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः।।

अत्र लक्ष्म्या पद्मगुणानां चन्द्रमस्याः शोभायाश्च युगपत् अननुभवे पद्मानां रात्रिसङ्कोचः चन्द्रस्य दिवा अनुदयश्च कारणत्वेन उक्तौ। तत्र पद्मानां रात्रौ सङ्कोच एव किमर्थं स्यात् दिवि किमिति न स्यात्? दिवापि चन्द्रस्य उपलब्ध्याऽविर्भावः अनुभूयत एव। अतः चन्द्रस्य दिवाऽनुदयः कथं इत्यादयः प्रश्नाः लोकप्रमाणादेव समाधेयाः। अतः अत्र लोकात् साध्यसाधनयोः व्याप्तिग्रहः।

**२ .वेदः:-**

शास्त्रमात्रप्रसिद्धार्थविषयो वेदः। वेदग्रहणं इतिहासपुराण-धर्मशास्त्रादीनाम् उपलक्षणम् (सङ्ग्राहकम्) तेषामपि वेदमूलत्वात्।

'अयाचितारं न हि देवमद्रिः सुतां प्रतिग्राहयितुं शशाक।
अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे।।'

अत्र हिमालयगतं कन्याग्राहणाशक्तत्वं कार्यम्। तत् कारणं च सम्प्रदानत्वहेतु भूतस्य भगवद्गतस्य याचनस्य अभावः। '**याचना भावश्च कन्याग्राहणशक्त्याभावे हेतुभूतः**' इत्ययं विषयः वेदमूलकात् शास्त्रप्रमाणादेव ज्ञायते। लोके सर्वाण्यपि दानानि प्रायशः अनर्थिने कर्तुं शक्यन्ते, परन्तु कन्यादानं न तथा। यदाहुः -

'अयाचितानि देयानि सर्वद्रव्याणि भारत।
अन्नं विद्या तथा कन्या अनर्थिभ्यो न दीयते।।'

किञ्च शास्त्रेणापि अर्थिन एव सम्प्रदानत्वमुक्तम्। तथा हि -

'अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम्।।'

एवं च अर्थित्वाभावः कन्याग्राहणाशक्तत्वे निदानम् इति शास्त्रेण ज्ञायते।

**३ . अध्यात्मम्:-**

आध्यात्मिकार्यविषयम् अध्यात्मम्। अध्यात्मम् इत्यत्र आत्मशब्दस्य मनः इत्यर्थः। एवं च मनः अपि क्वचित् कयोश्चित् कार्यकारणभावनिर्णायकं भवति।यथा -

'पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः।
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः।।'

अत्र भगवत् पशुपतिगतस्य कृच्छ्रदिवसातिवाहनस्य अद्रिसुतासमागमात्मकत्वस्य अध्यात्मसिद्धः कार्यकारणभावः अर्थात् मनोरूपप्रमाणेन तस्य कार्यकारणभावः निर्णेतुं शक्यते। एतत् कार्यकारणभावमूल एव साध्यसाधनभावः।

**स्वावलोकनप्रश्नाः**

१.लोको वेदः आध्यात्ममिति त्रीणि प्रमाणानि किं निरूपयन्ति?

..........................................................................................................

..........................................................................................................

IV. वाच्यानुमेययोः मुख्ययावृत्त्या व्यङ्ग्यव्यञ्जकभावाभावनिरूपणम् - वाच्यात् प्रकारान्तरेणाभिहितेऽर्थे चमत्काराधिक्यस्य निरूपणञ्च -

सर्व एव हि शाब्दो व्यवहारः साध्यसाधनभावगर्भतया प्रायेण अनुमाने अन्तर्भवति इत्युक्तं महिमभट्टेन। तत्र वाक्यार्थविषये साध्यसाधनभावे साध्यसाधनप्रतीत्योः क्रमः यथा सुलभः तथा अनुमेयवस्तुमात्र-अलङ्कारयोः-वाच्यस्य च मध्ये क्रमभावः अपि सुलक्ष्यः इतिवक्तुं शक्यते। एवञ्च वस्तु मात्रालङ्कारवाच्यानां मध्ये क्रमभावस्य स्पष्टत्वात्, तत्र सहभावनिबन्धन-व्यङ्ग्यव्यञ्जकभावः घटप्रदीपयोरिव न सम्भवति। अथ तयोः क्रमभावस्य सुस्पष्टतया व्यङ्ग्यव्यञ्जकभावभ्रान्तिरपि आरोपयितुं न शक्यते। किन्तु रसादौ अनुमेये, वाच्यस्य-अनुमेयस्य च क्रमस्य विद्यमानत्वेऽप्यसंलक्ष्यत्वेन तयोः क्रमस्य अस्पष्टत्वात्, तत्र वाच्यानुमेययोः व्यङ्ग्यव्यञ्जकभावः आरोपयितुं शक्यते। किमेवं व्यङ्ग्यव्यञ्जकभावारोपे निमित्तम्? इति चेत् सचेतनचमत्कारित्वमेव। यथा लोके शुक्लादितत्तद्वर्णैः अभिव्यङ्ग्ये अश्वरेखाचित्रे व्यङ्ग्यव्यञ्जकयोः एककालिकत्वभ्रान्त्या चमत्कारः जायते, एवं रसाद्यसंलक्ष्यक्रमानुमेयस्थलेऽपि वाच्यव्यङ्ग्ययोः क्रमस्य असंलक्ष्यतया तयोः क्रमस्यास्पष्टतया सहभावनिबन्धन-व्यङ्ग्यव्यञ्जकभावभ्रान्त्या कश्चित् आनन्दविशेषः जायते।

वाच्यो अर्थः न तथा चमत्कारं जनयति। यथा स एव विधिनिषेधादिः काक्वा अभिधेयतां अनुमेयतां वा अवतीर्णः आनन्दं जनयति। यथा -

'मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः'। इत्यत्र 'कौरवशतं समरे मथ्नाम्येव' इत्यादि विधेः अनुमेयत्वात् काक्वा प्रतीतस्य विधेः चमत्कारजनकत्वम्। एवं 'स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः' इति वाच्येन विधिना 'स्वस्थाः न भवन्तु' इति निषेधस्यानुमितौ चमत्कारात् वाच्यात् अनुमेये चारुत्वम्। ध्वनिकारेणापि अयमर्थः अङ्गीकृत एव।

'साररूपो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरां शोभामावहति।
प्रसिद्धिश्चेयमत्स्येव विदग्धपरिषत्सु यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते न वाच्यत्वेन।। (व्यक्ति.पृ.60.)

एवं प्रतिषेधद्वयानुमितस्य प्रकृतस्यैवार्थस्य विधेः चारुतावगतिः वामनाचार्येणाप्युपगता । इत्त्थम् वाच्यादनुमेये अधिकचमत्कारः, रसादावनुमेये वाच्यानुमेययोः व्यङ्ग्व्यञ्जकभावभ्रान्तेश्च चमत्कारः प्रयोजनम् अस्तीति सिद्धम्। किं त्वत्र कश्चित् प्रश्नः उपतिष्ठते। विभावादिवाक्यार्थसमकालमेव रत्यदीनां भावनां प्रतीतिः उपजायमाना सर्वैः अवधार्यते। नहि तत्र लिङ्गलिङ्गिनोरिव पदपदार्थयोरिव वा सम्बन्धस्य स्मरणापेक्षा काचिदस्ति। एवञ्च मुख्ययैव वृत्या घटप्रदीपयोरिव वाच्यानुमेयरसाद्योः व्यङ्ग्यव्यञ्जकभावोपपत्तौ अमुख्यव्यङ्ग्यव्यञ्जकभावाभ्युपगमः किमर्थः? ध्वनिकारेणाप्युक्तम्। व्यञ्जकत्वमार्गे तु यदार्थोऽर्थान्तरं द्योतयति, तदा स्वरूपं प्रकाशयन्नेवासावन्यस्य प्रकाशकः प्रतीयते प्रदीपवत्।

यथा - '**लीलाकमलपत्राणि गणयामास पार्वती।**' इत्यादौ ।

पुनः स एवाह - न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिः दूरीभवति। वाच्याविनाभावेन तस्य प्रकाशनात्। तस्माद् घटप्रदीपन्यायस्तयोः यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीप प्रकाशो निवर्तते तद्वद्व्यङ्ग्यप्रतीतौ वाच्यावभास इति। (व्यक्ति.पृ.66) तस्मात् ध्वनिकारोक्तदिशा मुख्य एवात्र व्यङ्ग्यव्यञ्जकभावः इति चेत्।

अत्रोच्यते। वाच्यप्रतीयमानरसयोः क्रमेणैव प्रतीतिः न समकालत्वम् इति ध्वनिकारेणैव मुक्तकण्ठम् उद्घाटितम्।

न हि विभावानुभावव्यभिचारिण एव रसा इति कस्यचिदवगमः। अत एव विभावादिप्रतीत्यविनाभाविनी रसादीनां प्रतीतिरिति तत्प्रतीत्योः कार्यकारणभावेनावस्थानात् क्रमोऽवश्यम्भावी। स तु लाघवान्न लक्ष्यत इत्यलक्ष्यक्रमा एव सन्तो व्यङ्ग्या रसादय इत्यक्तम् इति। (व्यक्ति.पृ.६७) ततश्च वाच्यप्रतीयमानरसयोरपि घटप्रदीपन्यायस्य वक्तुमशक्यत्वात् तयोः व्यङ्ग्यव्यञ्जकभावः चमत्कारार्थ एव भवति न वास्तवः।

एवञ्च वाच्यप्रतीयमानयोः सर्वत्र लिङ्गलिङ्गिभावस्य मुख्यत्वात् पर्यायोक्तादौ गुणीभूताव्यङ्ग्यादौ च साध्यसाधनभावार्थम् अनुमानं दृश्यत इति, सर्वस्यापि ध्वनिगुणीभूतादिप्रपञ्चस्य महाविषयत्वेन अनुमान एव अन्तर्भावः।

### V. रत्यादीनां नैयत्येन सुखास्वादजनकत्वं कुतः?

ननु रतिशोकादयः सुखदुःखादि विविधास्वादरूपाः। अतश्च काव्ये सुखास्वादस्येव दुःखास्वादस्यापि सम्भवः अस्ति। एवं सति रत्याद्यनुमेयानां व्यङ्ग्यत्वोपचारः कथं सुखैकास्वादात्मकचमत्कारप्रयोजनकः?

न हि लोके लिङ्गतः शोकादिषु अनुमीयमानेषु सुखास्वादस्य लवोऽपि दृश्यते। प्रत्युत साधूनां उदासीनानामपि भयशोकदौर्मनस्यादि दुःखमुपजायमानमनुभूयते। तत् कोऽनु विशेषः लोकतः काव्ये, येन अवश्यं सुखमेव आस्वादयेत् काव्यम्। विभावादीनां च गमकानां सद्भावेऽपि तेषां हेतुकार्य सहकारिरूपतया लोक इव तेषां सुखदुःखादिविवधानुभ-वजनकत्वौचित्यात्। एवञ्च

असंलक्ष्यक्रमस्थलेऽपि दुःखस्य अनिवार्यत्वे व्यङ्ग्यव्यञ्जकभाव उपचारस्य साध्यसाधनभावे कल्पनं व्यर्थमेवेति चेत्-

अत्रोच्यते - ' काव्ये विभावादिमुखेन भावानामवगमः' इति तत्रैव सहृदयैकवेद्यः रसास्वादः उदेति। विभावादीनां सुखप्रदत्वं वस्तुस्वभाव इति तेभ्यः कथं सुखस्योदयः इति प्रश्नः वह्नेः दाहः कथं भवतीति प्रश्नतुल्यो भविष्यति। भरतेनापि '**विभावानुभावव्यभिचारसंयोगात् रसनिष्पत्तिः**' इत्यासूत्रितम्। लोके च विभावादयः भावाः न सम्भवति, हेत्वादीनामेव तत्र सम्भवात्। न च विभावादयः हेत्वादयश्च एक एव अर्थ इति भ्रमितव्यम्, तेषां भिन्नलक्षणत्वात्। तथा हि - लोके रत्यादयः रामादिगताः स्थेमभाजः अवस्थाविशेषाः केचित्। त एव काव्यादौ कविप्रभृतिभिः आत्मनि अनुसंहिताः सन्तः भावा इत्युच्यन्ते तथा चोक्तं भरतेन-

नानाभिनयनसम्बद्धान् भावयन्ति रसानिमान्।
यस्मात् तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः।।

एवं लोके ये भावानां हेतवः सीताद्याः सन्ति, ता एव कव्यादिसमर्पिताः सन्तः विभाव्यन्ते एभिः वागङ्गाभियाश्रयाः अर्थाः इति व्युत्पत्या विभावा इत्युच्यन्ते। अर्थभावनाहेतूनां अत्यन्तवैलक्षण्यात्। तथाहि वस्तुमात्रं हि अनुमेयात् रसादेः वन्ह्यादेः धूमादि इव अत्यन्तविलक्षणम्। यतः वस्तुनः स्वभावः अन्यः रसस्य स्वभावः अन्यः, व्यभिचारिणस्तु रत्यादिछायानुविधायन इति रत्याद्युरक्ता इव उत्पद्यन्ते। अतो न रत्यादिभ्यः अत्यन्तविलक्षणाः व्यभिचार्यादयः। तथा च व्यभिचारिप्रतीतेः रत्यादि-प्रतीतिमिश्रिततयाभावात् तत्र व्यभिचारिव्यवधानेऽपि रत्यादेः ध्वनित्वम् इष्टमेव। एवं वाच्यात् अलङ्कान्तरप्रतीति- व्यवधानेन रसप्रतीतावपि व्यवधायक अलङ्कारस्य प्रतीतेः रसोपस्कारकत्वेन अलङ्कारस्य उपस्कार्यरसातिरिक्ततया अनवस्थानात् तत् व्यवधानेऽपि ध्वनित्वं इष्टमेव। वाच्यस्य रसस्य च मध्ये वस्तुनः व्यवधानेषु वस्तुनः अनुमीयमानरसादिविलक्षणतया अतीवदूरतया रसप्रत्यायकत्वम् इति, प्रहेलिकाप्रायत्वेन काव्यत्वं तत् नास्तीति ध्वनिलक्षणस्य तत्र अतिव्याप्तिः प्रतिपाद्यते। तथा हि एकेन वस्तुना अन्तरिता प्रतीतिः यथा -

**'शिखिपिच्छकर्णपूरा वधूर्व्याधस्य गर्विणी भ्रमति।**
**मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम्।।' (व्यक्ति.पृ.२०)**

अत्र सगर्वभ्रमणकर्तृत्वेन हेतुना व्याधवध्वाः सौभाग्यातिरेकः अनुमीयते। स च व्यङ्ग्यः सौभाग्यातिरेकः व्याधवध्वाः पत्युः अविरतसम्भोगसुखासङ्गदुर्बलतया मयूरमात्रमारणक्षमत्वलक्षणेन अनुमीयमानेन वस्तुना व्यवहितः। द्वाभ्याम् अन्तरिता यथा --

**'वाणिजक! हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च।**
**यावल्लुलितालकमुखी गृहे परिष्वक्कते स्नुषा।।'**

अत्र वृद्धव्याधेन वाणिजकं प्रति हस्तिदन्ताद्यभावप्रतिपादनं कार्यम्। स च हस्तिदन्ताद्यभावः स्नुषायाः विलुलितालकमुखीत्वेन लिङ्गेन व्यापकविरुद्धकार्योपलब्धिलिङ्गक अनुमानप्रक्रियया परम्परया

प्रतीयते। अत्र सामान्यतः अनुमानप्रकारस्तु इत्थम् -

**'अस्मद्गृहं गजदन्ताद्यभाववत्, लुलितालकमुखस्नुषाश्रयत्वात्ः यन्नैवम् तन्नैवम्ः यथा प्रातिवेशिक व्याधगृहम्।'** अत्र व्यापकविरुद्धोपलब्धेश्च समन्वयश्च इत्थम्- 'व्यापकम् इत्युक्ते व्याप्यं हस्तिदन्तव्याघ्रजिनसद्भावं प्रतिव्यापकं समर्थसुतनिष्ठं हस्तिव्याघ्रादिमारणपरत्वम्। तद्विरुद्धं च स्नुषासौभाग्यातिरेकप्रयुक्त सम्भोगसुखासेव-नजनितदुर्बलत्वम्। तत्कार्यकं च विलुलितालकमुखीत्वम्। तादृश कारणोपलब्धेः परम्परया (स्नुषाययाः विलुलितालकमुखीत्वात् व्याधसुतस्य अविरतसंभोग दुर्बलत्वं, तेन च हस्ति मरणपत्वाभावः, तेन च हस्तिदन्तव्याघ्राजिनाद्यभावः) साध्यत' इति व्यापकविरुद्धकार्योपल-ब्धिलिङ्गकानुमानसमन्वयः।

एतच्च नात्र तुषारस्पर्शो धूमात् हस्तिव्याघ्रादिमारणपरत्वाभाव लक्षण वस्तुद्वयान्तरिता व्यङ्ग्यप्रतीतिः।

त्रिभिरन्तरिता यथा -

**'विपरीतसुरतसमये ब्रह्माणं दृष्ट्वा नाभिकमले।**
**हरेर्दक्षिणनयनं चुम्बति ह्रियाकुला लक्ष्मीः।।'**

अत्र लक्ष्मीलज्जानिवृत्तिः अनुमेयभूता। तां प्रति भगवत् हरेः दक्षिणस्य अक्ष्णः सूर्यात्मकस्य लक्ष्मीकतृकपरिचुम्बनं परम्परया हेतुः। तथा हि दक्षिणनयनचुम्बनं सूर्यतिरोधानलक्षणं सूर्यास्तमयम् अनुमापयति। सा च सूर्यास्तं गतिः तत् समकालीन विष्णुनाभिनलिनसङ्कोचम् अनुमापयति। स च नाभिकमलसङ्कोचे ब्रह्मणः अदर्शनम् अनुमापयति। तेन च विपरीतरतप्रसक्तायाः लज्जानिवृत्तिः साध्यते। तथा च लज्जानिवृत्तेः अनुमेयायाः लक्ष्मीकर्तृकहरिनयन कर्मक चुम्बनरूप वाच्यार्थस्य च सूर्यस्तमय-पद्मसङ्कोच-ब्रह्मादर्शनरूप वस्तुत्रयव्यवहितत्वात् त्र्यन्तरितायाः अनुमेयप्रतीतेः इदम् उदाहरणम्। एषु पूर्वोक्तेषु त्रिष्वप्युदाहरणेषु रसादिप्रतीतेः व्यङ्ग्य वस्त्वन्तरितत्वेन विलम्बेन प्रतीतिः इति, प्रहेलिकायामिव न ध्वनिलक्षणं तत् प्रवर्तत इति अतिव्याप्तिः लक्षणदोषः। किन्तु-

**'पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।**
**सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान।।'**

इति पद्ये कौतुक-ओत्सुक्य-प्रहर्ष-लज्जादि व्यभिचारिभाव व्यवधानेनाऽपि गौरीनिष्ठ अभिलाषशृङ्गारस्य अवगतौ सत्यां ध्वनित्वे नास्ति कश्चित् बाधः, कौतुकादीनां व्यभिचारीणां शृङ्गारशरीरान्तर्गतत्वेन व्यवधायकत्व भावात्। एवं -

**'लावण्यकान्ति परिपूरितदिङ्मुखेऽस्मिन्**
**स्मेरेऽधुना तव मुखे तरलायताक्षि।**
**क्षोभं यदेति वा मनागपि तेन मन्ये**
**सुव्यक्तमेव जडराशिरयं पयोधिः।।'**

इत्यत्र वदने पूर्णेन्दुबिम्बरूपकं अनुमीयमानं रसप्रतीतौ विभावत्वेन उपयुज्यत इति,

प्रतीयमानरूपकस्य व्यवधानेऽपि आन्तरङ्गिकत्वात् ध्वनित्वमेवेति न तत्र ध्वनिलक्षणस्य अतिव्याप्तिरिति शम्।

VIII.सर्वेषां नामपदानां क्रियैवैका प्रवृत्तिनिमित्तम्

अनुमानान्तर्भावयोग्यः शाब्दव्यवहारः पदवाक्यात्मकशब्दैः प्रचलति। तत्र पदं नाम -आख्यात-उपसर्ग-निपात-कर्मप्रवतनीयात्मना पञ्चविधम्। तत्र सिद्धबोधकानि नामानि। तानि च जाति- गुण-क्रिया-द्रव्य भेदेन चतुर्धा विभक्तानि। तत्र घटादिशब्दाः घटत्वादिजातिं प्रवृत्तिनिमित्तत्वेन अस्थाय कम्बुग्रीवादिमत् व्यक्तिविशेषरूपार्थं बोधयन्ति। क्वचित् नीलादिशब्देषु गुणः, पाचक-पाठकादिशब्देषु पाकादिक्रिया, डित्थादिशब्देषु वर्णसमुदायश्च प्रवृत्तिनिमित्तभावं भजत इति चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारमतं व्यवस्थितम्। केचन मीमांसकाः सर्वेषां शब्दानां जातिमेव प्रवृत्तिनिमित्तं मेनेरे। प्रवृत्तिनिमित्तं हि शब्दानां प्रतिनियतार्थबोधनाय स्वीक्रियते।

**स्वावलोकनप्रश्नाः**

१.जातेरेव प्रवृत्तिनिमित्तत्त्वं के के अङ्गीकुर्वन्ति?

..........................................................................................

२.जात्यादेः प्रवृत्तिनिमित्तत्त्वं के अङ्गीकुर्वन्ति?

..........................................................................................

..........................................................................................

यदि घटशब्दः घटत्वजातिं विनापि घटरूपार्थं बोधयेत्, तर्हि घटशब्दः घटत्वभावविशेषात् पटमपि बोधयेत्। अतः घटशब्दात् घटरूपार्थबोध एव भवति, न पटरूपार्थबोधः इति नियमसंरक्षणाय जातेः तत्र प्रवृत्तिनिमित्तत्वं आस्थीयते इति, सर्वेषां शब्दानां जातिप्रवृत्तिनिमित्तकत्ववादिनः कथयन्ति।

परं महिमभट्टः 'केचित् पुनरेषां क्रियैवैका प्रवृत्तिमित्तमिति क्रियाशब्दत्वमेव सर्वेषां नामपदानामभ्युपगच्छन्ति' इति कथयन् नूत्नतया क्रियाप्रवृत्तिनिमित्तवादं व्यवस्थापायाञ्चकार। तस्यायमाशयः। घटादिशब्दाः स्वार्थे प्रवर्तमानाः घटनक्रियामेव प्रवृत्तिनिमित्तभावेन आलम्बन्ते। घटनक्रियैव प्रवृत्तिनिमित्तं इत्यत्र ग्राहकं किं प्रमाणम्? इत्युक्ते अन्वयव्यतिरेकावेव। घटनक्रियासत्वे घटरूपार्थप्रतीतिः, घटनक्रियाभावे घटरूपार्थप्रतीत्यभावः। एवं क्रियैव घटादिशब्दानां प्रवृत्तौ निमित्तं न घटत्वादिसामान्यम्। एषा च घटनक्रिया घटत्वसामान्येन युक्ता वा अन्यथा वा भवतु, सर्वथा घटनक्रियां पुरस्कृत्यैव घटशब्दव्यवहारः। सत्यपि घटत्वसामान्ये घटनक्रियामप्राप्तः न घट इति व्यपदेष्टुं शक्यते।

अयमभिप्रायः । कुलालेन दण्डचक्रादिसहायेन घटे निर्मितेऽपि तत्र घटत्वसामान्यस्य सत्वेऽपि तावता घटव्यवहारः न सिध्यति। यदा जगत् वैचित्र्यसन्धातुः ईश्वरस्य सङ्कल्पवशात्

जडेऽपि घटे घटत्वापत्तिलक्षणा घटनात्मिका क्रिया निष्पद्यते, तदैव घटशब्दव्यवहारः भवति, नान्यथा। अन्यथा (घटत्वापत्तिलक्षणक्रियायाः अभावे) पटोऽपि घटपदव्यपदेशविषयः स्यात्। एवं शुक्लपदमपि शुक्लत्वापत्तिलक्षणक्रियामेव प्रवृत्तिनिमित्तीकृत्य शुक्लरूपार्थं बोधयति। पाचकशब्दोऽपि पाचकत्वापत्तिलक्षणक्रियामेव प्रवृत्तिनिमित्तीकृत्य पाकक्रियाकर्तृबोधकम्।

ननु '**घट-चेष्टायाम्**' इति धातोः पचादित्वात् कर्तरि अच्प्रत्यये (घटतीति घटः) घटते इत्यर्थे घटशब्दस्य निष्पन्नत्वात् क्रियायाः प्रवृत्तिनिमित्तत्वम् अस्माभिरपि (जातिप्रवृत्तिनिमित्तवादिभिरपि) आश्रीयते। तथा सति भवतां क्रियाप्रवृत्तिनिमित्तवादे को वा नूतनो विषयः? अतः व्यर्थपक्षान्तरोपन्यासः इति चेत् -

**अत्रोच्यते** - सत्यमिष्यत एव भवद्भिरपि सा क्रिया निमित्तत्वेन किन्तु व्युत्पत्तिनिमित्तत्वेन इष्यते। अन्यद्धि व्युत्पत्तिनिमित्तं अन्यच्च प्रवृत्तिनिमित्तम्। प्रवृत्तिनिमित्तं नाम वाच्यत्त्वे सति वाच्यवृत्तत्त्वे सति वाच्योपस्थितिप्रकारत्वम्। व्युत्पत्तिनिमित्तं च प्रक्रियावाक्यजन्यबोधे प्रकारीभूय भासमानः धर्मः। यथा गोशब्दविषये गच्छतीति गौः इति व्युत्पत्तिः प्रतिपाद्यते। यदि गमनक्रियैव गोशब्दस्य प्रवृत्तौ निमित्तं स्यात्, तर्हि आगच्छति गवि गोशब्दव्यवहारो न स्यात्। अत एव गमनक्रियायाः व्युत्पत्तिनिमित्तत्वं स्वीकृत्य गोत्वजातेः प्रवृत्तिनिमित्तत्वमास्थाय व्यवहारं निर्वहन्ति एके आचार्याः ,वयन्तु ब्रूमः, यत् - जातिरपि प्रवृत्तिनिमित्तं मास्तु। किन्तु क्रियैव प्रवृत्तिनिमित्तम्। यतः पदार्थोत्पत्तेः प्राक् पदार्थविनाशानन्तरं च विद्यमानजातिः न कदाचिदपि वस्तुनः प्राणपदा भवति। किन्तु व्यवहारयोग्यतासम्पदानार्थं ईश्वरेण चित्रविचित्रार्थावभासाय परिकल्पिता या तत्त्वापत्तिलक्षणक्रिया सैव नामपदानां प्रवृत्तौ निमित्तम्। सा च वस्तुनः व्यवहारकाले अबाधितं तिष्ठतीति तस्याः  क्रियायाः प्रवृत्तिनिमित्तत्वं युक्तम्।

**स्वावलोकनप्रश्नाः**

व्युत्पत्तिनिमित्तत् प्रवृत्तिनिमित्तत्वयोः भेदं सोदाहरणं लिखत।

......................................................................................................

अन्यच्च महिमभट्टमते क्रियाप्रवृत्तिनिमित्तवादस्य स्वीकारात् 'अश्वति खरः' इत्यादौ अश्वत्वमासादयति इत्येव अर्थः क्लिबन्त अश्वशब्दात् प्रतीयते। अतः 'उपमानादाचारे' इति पाणिनि आचारार्थे विधीयमानः प्रत्ययः अश्वशब्दस्य प्रवृत्तिनिमित्तभूतायाम् अश्वत्वा-पत्तिलक्षणक्रियायमेव वक्तव्यः न तु उपमानात् आचारार्थे। आचारार्थस्तावत् अश्वशब्दप्रवृत्तिनिमित्त अश्वापत्तिलक्षणक्रिययैव अर्थात् सिध्यतीति पाणिनिना आचारार्थे प्रत्ययाशंसनं न कर्तव्यम्। एतदेव परिकरश्लोकेषु महिमभट्टेन आविष्कृतम्।

**घटनं च तदात्मत्वापत्तिरूपाक्रिया मता।**
**मूलञ्च तस्याश्चित्रार्थाभासाविष्कृतिरीशितुः।।**
तस्यामेव क्विबाद्याश्च विधेयाः कर्तृमात्रतः।

**न तूपमानादाचरे तयोरर्थात् प्रतीतितः।।**
**यथा ह्यश्वति बालेय इत्यतोऽर्थः प्रतीयते।**
**अश्वत्वमासादयति खर इत्यर्थतः पुनः।।**
**अश्वतुल्यसमाचारः खर इत्यवसीयते। (व्यक्ति.पृ.38)**

एवं क्रियाप्रवृत्तिनिमित्तवादस्वीकारादेव गण्डादिशब्दस्थले उपयोगिनं वदनैकदेशार्थकं गडिधातुं 'गडि-वदनैकदेशे' इति प्राणिनिः धातुपाठे पपाठ। यदि शब्दानां तदात्मत्वापत्तिलक्षणक्रिया न प्रवृत्तिनिमित्तम्, तर्हि वदनैकदेशरूपद्रव्यावयववाचक 'गडि' धातोः क्रियावाचकत्वाभावेन धातुसंज्ञैव न स्यादिति महदसाङ्गत्यं प्रसज्येत। एवं 'विपच्य घटो भवति' इति प्रयोगे 'बहिरङ्गसत्ताक्रियानिरूपितपौर्वकाल्यं पुरस्कृत्य न (विपूर्वक) पच् धातोः क्त्वाप्रत्ययो ल्यप् प्रत्ययश्च। किन्तु अन्तरङ्ग घटत्वापत्तिलक्षणाक्रियानिरूपितपौर्वकाल्यं पुरस्कृत्यैव विपच्य इति ल्यप् प्रत्ययस्य उपपत्तिः इति सर्वेषां नामपदानां क्रियैवैका प्रवृत्तिनिमित्तं इति वादस्य परमार्थः। अयमेवार्थः सार्धैकसङ्ग्रहलोके निरूपितः।

**'नाम्नः सत्त्वप्रधानस्य धातुकारोऽत एव हि।**
**शब्दवक्त्रैकदेशादेर्धात्वर्थत्वमवोचत।।**

एवञ्च विपच्य घटो भवतीति क्त्वोऽस्य पूर्वकालत्वम्।' (व्यक्ति.पृ.43)

VIII. प्रयुज्यमानक्रियापेक्षमेव च प्रायेण पौर्वकाल्यं क्त्वो विषयः न प्रतीयमानक्रियापेक्षम् :-

महिमभट्टोक्तदशा सर्वेषां नामपदानां तत्त्वापत्तिलक्षणाक्रियैव प्रवृत्तिनिमित्तमित्युक्तम्। तादृशक्रियायाः अपेक्षयैव 'विपच्य घटो भवती'त्यादौ विपच्येति ल्यप् प्रत्ययस्योपपत्तिः वेदितव्या। तत्र भावनात्मकं व्यभिचरितक्रियानिरूपितपौर्वकाल्यं पुरस्कृत्य (विपूर्वक) पच् धातोः क्त्वा प्रत्ययानुशासने असाङ्गत्यात्, अन्तरङ्गघटत्वापत्तिलक्षणा, क्रियां पुरस्कृत्यैव विपाकस्य पौर्वकाल्यं, (विपूर्वक) पच् धातोः 'समान कर्तृकयोः पूर्वकाले' इति सूत्रेण क्त्वा प्रत्ययः। ततः विपूर्वकपच् धातोः परस्य क्त्वा प्रत्ययस्य ल्यबादेशश्च भवति। एवं 'अधिश्रित्य पाचको भवति' इति प्रयोगेऽपि पाचकः इत्यत्र अन्तरङ्गपाकक्रियानिरूपितपौर्वकाल्यं पुरस्कृत्यैव (अधिपूर्वक) श्रिधातोः क्त्वा प्रत्ययो 'ल्यप्' प्रत्ययश्च वेदितव्यः। न हि तत्र भवनक्रियापेक्षं पौर्वकाल्यम्। सा हि क्रिया न अवश्यं प्रयुज्यते, अपि तु प्रतीयते पदार्थानां सत्ताव्यभिचारात्। अत एव प्रायेण प्रयुज्यमानक्रियापेक्षमेव पौर्वकाल्यं 'क्त्वा' प्रत्ययस्य विषयः न प्रतीतमानक्रियापेक्षं पौर्वकाल्यम्। अन्यथा -

'श्रुत्वापि नाम बधिरो दृष्ट्वाप्यन्धो जडो विदित्वापि।
यो देशकालकार्यव्यपेक्षया पण्डितः स पुमान्।।'(व्यक्ति.पृ.35)

अत्र 'श्रुत्वापि नाम बधिरः' इति प्रयोगे बाधिर्यं नाम श्रुत्यादिशक्तिविरहस्वभावम्। तत्र श्रवणक्रियायां पौर्वकाल्यं श्रवणशक्त्यभावलक्षणबाधिर्यक्रियानिरूपितमेव, न अन्यबहिरङ्गक्रियापेक्षम्।

एवं 'दृष्ट्वाप्यन्धः' 'जडो विदित्वापि' इति प्रयोगेऽपि बोध्यम्।

बह्वीषु च क्रियासु उत्तरोत्तरक्रियापेक्षमेव पूर्वपूर्वक्रियापौर्वकाल्यम्। यथा 'स्नात्वा,भुक्त्वा,पीत्वा व्रजति' इत्यादौ स्नान-भोजन-पान-व्रजिक्रियाणां मध्ये उत्तरोत्तर क्रियापेक्षमेव पूर्वपूर्वक्रियापौर्वकाल्यम्। एवं 'विपच्य घटो भवती'त्यादौ उत्तरघटनक्रियापेक्षमेव विपचनस्य पौर्वकाल्यम्, उभयत्रापि कर्तृबोधकप्रत्ययस्याविशेषेण निर्देशात्। एवं क्त्वाप्रत्ययप्रकृतिभूतक्रियायाः पौर्वकाल्यं सूक्ष्मतया ग्राह्योत्तरक्रियानिरूपितं वेदितव्यम्। अत एव क्त्वा प्रत्ययस्थले भिन्नकर्तृकत्वभ्रान्तिः। सा च कतिपयकारणैः भवति।

१. कृदन्तवाच्यकर्तृः क्रियायाः विशेषणत्वेन निर्देशः।

२. कर्तृसम्बन्धित्वेन क्रियायाः प्राधान्येन निर्देशः।

३. क्वचित् कर्तुः अनुपादानम्।

४. क्वचित् क्रियाया अनुपादानं च।

१.तत्र कृद्वाच्यकर्तुः विशेषणभावं गमिता क्रिया भिन्नकर्तृकत्वभ्रमाय भवति। यथा -

'शिशिरकालमपास्य गुणोऽस्य नः क इव शीतरहस्य कुचोष्मणः।
इति धीयास्तरुषः परिरेभिरे घनमतो नमतोऽनुमतान् प्रियाः।।'

अत्र 'शीतरहस्य' इत्यत्र हृञ् धातोः अच् प्रत्यये 'हर' इति रूपं निष्पन्नम्। अच्प्रत्ययरूपकृद्वाच्यः कर्ता। तम्प्रति शीतहरणक्रिया विशेषणीभूता। सा शिशिरकालापासनक्रिया च कुचोष्मात्मककर्तृनिष्ठे। तत्र शीतहरणक्रियायाः कृद्वाच्यकर्तृरूपाधिभावं गतत्वेन भिन्नकर्तृकत्वभ्रान्तिः। एवं 'निरीक्ष्य' संरम्भनिरस्तधैर्यम्' इत्यादि पद्येऽपि निरीक्षणक्रियायाः भिन्नकर्तृकत्वभ्रान्तं जनयतः। एतादृश भिन्नकर्तृकत्वभ्रमादेव शिशिरकालमपास्य इत्यत्र अपास्येति ल्यबन्तप्रतिरूपकम् अव्ययमिति केचित् व्याचक्षुः।

२. 'स्मर संस्मृत्य न शान्तिरस्ति मे' इत्यत्र कर्तृभूतास्मात्पदार्थ सम्बन्धितया प्राधान्येन शान्तिक्रियायाः उपादानात् 'संस्मृत्य' इत्यत्र भिन्नकर्तृकत्वभ्रान्तिर्जायते।

३. कर्तृरनुपादानं भिन्नकर्तृकत्वभ्रमे हेतुः। यथा -

'ननु सर्व एव समवेक्ष्य कमपि गुणमेति पूज्यताम्।
सर्वगुणविरहितस्य हरेः परिपूजया कुरुनरेन्द्र को गुणः।।'

अत्र समवेक्षणं पूजनं चेति द्वे क्रिये स्तः। तयोश्च कर्म सर्वपदार्थः। तयोः कर्ता च लोकः। ते द्वे अपि क्रिये यद्यपि लोकात्मक एककर्तृके, तथापि लोकात्मकस्य एकस्य कर्तृः अनुपादानात् भिन्नकर्तृकत्वभ्रमः जायते।

४. क्रियायाः अनुपादानमपि क्वचित् भिन्नकर्तृकत्वभ्रमाय भवति यथा -

**‘अकृत्वा परसन्तपमगत्वा खलनम्रताम्।**
**अनुत्सृज्य सतां मार्गं यत् स्वल्पमपि तद्बहु।।‘ (व्यक्ति.पृ.३७)**

अत्र अभावप्रतियोगिभूतानां करण-गमन-उत्सर्जनक्रियाणां ‘क्त्वा’ प्रत्ययः प्रकृतिभूतधातूपरस्थाप्यानां भिन्नकर्तृकत्वभ्रान्तिः ‘स्वल्पमपि’ इत्यत्र अनुपात्तायाः ‘लभ्यते’ इति लाभक्रियायाः जायते।

एतादृशभिन्नकर्तृकत्वभ्रान्ति निवारणमपि व्युत्पन्नचित्तैः हेत्वन्वेषणपुरस्सरं कर्तव्यम्।

व्यक्तिविवेकः -- द्वितीयखण्डप्रश्नाः

१. शाब्दस्य व्यवहारस्य अनुमानरूपत्वं निरूपयत।
२. महिमभट्टदिशा अर्थविभागं दर्शयत।
३. साध्यसाधनभावस्वरूपं सप्रकारं लिखत।
४. अविनाभावसम्बन्धनिश्चये प्रमाणानि दर्शयत।
५. वाच्यानुमेययोः अर्थयोः मुख्यया वृत्त्या व्यङ्ग्यव्यञ्जकभावाभावं विशदयत।
६. रत्यादीनां केवलसुखास्वादजनकत्वं कुतः।
७. नामपदानां क्रियायाः एव प्रवृत्तिनिमित्तत्वं निरूपयत।
८. ‘प्रयुज्यमान क्रियापेक्षमेव च प्रायेण पौर्वकाल्यं क्त्वो विषयः न प्रतीयमानापेक्षम्’ -- व्याख्यात।

# व्यक्तिविवेकः -तृतीयखण्डः

**संरचना**

३.०.प्रस्तावना
३.१.लक्षिताधिगमविशेषाः
३.२ शब्दस्य अभिधा एक एव व्यापारः
१. लक्षणायाः अनुमानेऽन्तर्भावप्रकारः.
२. तात्पर्यवृत्तेः अनुमानेऽन्तर्भावः.
३. दीर्घदीर्घतराभिधाव्यापार खण्डनम्.
३.३. वक्रोक्तिजीवितकार-काव्यलक्षण-खण्डनम्.
३.४. शब्दस्य व्यञ्जकत्वाभावनिरूपणम्.
३.५. प्रादीनां वाचकत्वविचारः.
३.६. ध्वनिगुणीभूतव्यङ्ग्यभेदानुपपत्तिः.
३.७. अविवक्षितवाच्यविवक्षितान्यपरवाच्ययोः ध्वनिप्रकारत्वानुपपत्तिः.

## ३.०.प्रस्तावना

शब्दस्य अभिधा-लक्षणा-व्यञ्जनाः तिस्रः वृत्तयः इति यः आलङ्कारिकाणां सिद्धान्तः,तस्य तिरस्कारः यद्यपि तत्र तत्र मनाक् स्पृष्टः तथापि महिमभट्टादीनां नैय्यायिकानां शब्दस्य अभिधामात्रव्यापारप्रवणानां स्पष्टः अभिप्रायः अत्र विविच्यते।तात्पर्यार्थोऽपि केषुचित् इत्युक्तरीत्या अङ्गीकृतः तात्पर्यार्थोऽपि अनुमाने एवान्तर्भवतीति निरूप्य,शब्दस्य व्यञ्जकत्वाभावः प्रतिपाद्यते।

प्रासङ्गिकतया प्रादीनां वाचकत्वविचारः,ध्वनि-गुणीभूतव्यङ्ग्यभेद निराकरणमित्यादयो विषयाः अत्र विविच्यन्ते।

## ३.२.लक्षिताधिगमविशेषाः

- अभिधा-लक्षणा-व्यञ्जना व्यापाराणां लक्षणानां अनुस्मरणम्
- गङ्गायां घोषः इत्याद्युदाहरणेषु विविधव्यापाराणां समन्वयकथनम्
- तात्पर्यस्य स्वरूपविवेचनम्
- नैय्यायिकानां मते शब्दस्य अभिधा एका एव शक्तिरिति अवगच्छन्ति।

## ३.३. शब्दस्याभिधा एक एव व्यापारः.

१. लक्षणायाः अनुमाने अन्तर्भावप्रकारः :-

शब्दस्य अभिधा-लक्षणा-तात्पर्य-व्यञ्जनाख्या चतुरो व्यापारान् केचिदालङ्कारिकाः अभ्युपगच्छन्ति। किन्तु 'शब्दस्य अभिधा एक एव व्यापारः' इति महिमभट्टः अभिप्रैति। तथाहि यदि

एकाश्रयाः अनेकशक्तयः अभ्युपगता भवेयुः, तर्हि तेषाम् एकाश्रितशक्तीनां पौर्वापर्यनैरपेक्ष्येण कार्यकारित्वं दृष्टम्। यथा- अग्निगतदाहकत्व-प्रकाशकत्वशक्त्योः। न हि तयोः स्वस्वकार्यनिर्वहणे प्रथमतः दाहकत्वं, ततः प्रकाशकत्वं अथवा प्रथमतः प्रकाशकत्वं ततः दाहकत्वम् इति तयोः पौर्वापर्यनियमः कोऽपि अस्ति। किन्तु शब्दे अभिधा लक्षणा - व्यञ्जनात्मकाः व्यापाराः यदि अङ्गीकृताः, तर्हि तेषां मध्ये क्रमः अवश्यमभ्युपगन्तव्यः। न हि अभिधाव्यापारेण स्वार्थबोधनं विना अनुपपत्तिप्रतिसन्धानमूलकः लक्ष्यार्थः स्फुरेत्। लक्ष्यार्थबाधं विना तत् फलांशभूतः व्यङ्ग्यार्थोऽपि न स्फुरेत्। एवञ्च तेषां व्यापाराणां क्रमेण कार्यकारित्वं दृष्टं अग्न्याश्रितदाहकत्व-प्रकाशकत्वयोस्तु युगपदेव,एककाल एव कार्यकारित्वं दृष्टम्। तस्मात् एकाश्रितानेकशक्तिवैधर्म्यात् शब्दस्य अभिधातिरिक्तः व्यापारः न स्वीक्रियते। तर्हि लक्षणायाः शब्दो यदि नाश्रयः, तर्हि तस्याः को वा आश्रयः इत्युक्ते अर्थ एव नान्यः।

तथाहि 'गौर्वाहीकः' इत्यत्र द्वयोः प्रथमान्तयोः उपादानात् समानविभक्तिकत्वेन गवि वाहीकाभेदः प्रतीयते। स च बाधितः गोवाहीकयोः पशुमानवजातीयत्वेन अत्यन्तभिन्नत्वात्। तथापि तयोः अभेदः प्रतिपाद्यमानः अनुपपन्नस्सन्, केनचिदंशेन वाहीके तत्त्वमनुमापयति न सर्वात्मना। न हि अनुन्मत्तः कश्चित् क्वचित् किञ्चित् साधर्म्यमनुपश्यन्नेव अकस्मात् तत्त्वमारोपयति। अतः वाक्यप्रयोक्तृस्वरूपपर्यालोचनेन तत्त्वारोपनिमित्तं सादृश्यमात्रमेव प्रतिपत्ता अत्र प्रतिपद्यते। तच्च सादृश्यमनुपपद्यामानार्थप्रतीतिसमनन्तरमेव भासते, न तु फलविधया अन्ततो भासते। तथा अनुपपद्यमानाभेदशालिना गवाद्यर्थेन सह साधर्म्यरूपस्य जाड्यमान्द्यादेः भाने वाहीकादौ अनायासेन गवादिगतजाड्येदिधर्मप्रतिपादनम् एव प्रयोजनम्। तच्च लिङ्गविधयैव सादृश्यरूपार्थात् समायातीति, न शब्दे व्यञ्जनान्तादिरूपव्यापारान्तरपरिकल्पनम्। अथ च अर्थान्तरे शब्दविनिवेशो नाम अतिदेशप्रकारः। एतादृशस्थले एव, जातिवाचकशब्दस्य जातिं विनापि सम्बन्धिसदृशात् धर्मात् यत्र प्रयोगः क्रियते तत्र गुणवृत्तिः इति केचित् ऊचिरे।

**'जातिशब्दोऽन्तरेणापि जातिं यत्र प्रयुज्यते।**
**सम्बन्धिसदृशाद्धर्मात् तं गौणमपरे विदुः।।'** (व्यक्ति.पृ.११५)

परन्तु अस्मन्मते अविनाभावसम्बन्धेन गोरूपार्थात् गोगतजाड्यमान्द्यादिधर्माणां भानात् एतदनुमानमेव। तथा च अनुमानम् 'गोरूपार्थः जाड्यमान्द्यादिसाधर्म्यबोधकः अनुपपद्यमानवाहीकाद्यर्थान्तरतादात्म्यप्रतियोगित्वे सति वाहीकसादृश्याविनाभूतत्वात्' इति अर्थगतेन अनुमानेनैव निर्वहात् गुणवृत्तिनामकलक्षणाङ्गीकारः व्यर्थ एव।

एवं 'कृशाङ्ग्यास्सन्तापं वदति बिसिनीपत्रशयनम्' इत्यत्रापि वदनरूपात् वाच्यात् अर्थात् प्रकाशरूपस्य अर्थस्य यत्र प्रतिपत्तिः, सा प्रतिपत्तिरपि तयोः कार्यकारणभावसम्बन्धकृत अविनाभावात् भवति इति, प्रकाशरूपः अर्थः अनुमेय एव भवति न 'वदति' शब्दस्य लक्ष्यार्थः। अन्यथानुपपत्तिरूपायाः अर्थापत्तेः अनुमान एव अन्तर्भाव इति, सोऽपि न अचेतन बिसिनीपत्रशयननिष्ठ वदनक्रियान्यथानुपपत्तिमूलक इति आक्षेपलभ्यः, न वा लक्षणागम्यः, अपि तु अविनाभावसम्बन्धमूलकत्वात् अनुमेय एव। तथा

चानुमानम्- वदनं प्रकाशरूपार्थान्तरविषयं अनुपपद्यमानस्वार्थकत्वे सति प्रकाशाविनाभावित्वात् यन्नैवं तन्नैवम् इति।

एवं 'गङ्गायां घोषः' इति सम्बन्धमूलकत्वलक्षणस्थले गङ्गापदवाच्यस्य गङ्गाप्रवाहस्य घोषे आधाराधेयभावसम्बन्धेन अन्वयानुपपत्तेः, वाच्यार्थः गङ्गाप्रवाहः सामीप्यसम्बन्धमात्रपरिकल्पित गङ्गात्वधर्मवन्तं (शैत्यपावनादिप्रतीतिमात्रजननक्षमगङ्गात्वधर्मवन्तं) आधाराधेयभावेन घोषान्वयिनं तटरूपमर्थान्तरम् अनुमानव्यापारेण बोधयति। न हि तत्सादृश्यमेव एकं तत्त्वारोपनिबन्धनमपि तु तत्सम्बन्धोऽपि इति।तत्सम्बन्धमात्रेण आरोपितगङ्गात्वभावः तटादिरेव घोषाद्यधि-करणभावोपादानान्यथानुपपत्त्या गङ्गादीनामर्थानामनुमेयः भवति। गङ्गाशब्दस्त्वत्र स्वार्थाभिधानमात्रविश्रान्तसामर्थ्यः न अर्थान्तरस्य तटादेः वार्तामपि स्पृशति। न च 'गङ्गातीरे घोषः' इति साक्षात् शब्दप्रयोग एव अस्तु किं 'गङ्गायां घोषः' इति उक्तिवैचित्र्यपरिग्रहेण इति धर्मप्रतिपत्त्यर्थं तथाविधप्रयोगात्। यदि तटं तटत्वेन प्रत्यपादयिष्यत तर्हि तटस्य गङ्गात्वेन अभावात् शैत्यपावनात्वादिः न अवागमिष्यत। तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजन सम्प्रत्ययः।एवञ्च अत्र चमत्कारिणं केषाञ्चित् शैत्यपावनत्वादिधर्माणामेव भानं, न तु गङ्गासादृश्यस्य। अत एव सादृश्यनिबन्धनायाः सम्बन्धनिबन्धने विशेषः। एषा च अनुमानात्मकार्थ व्यापारभूता लक्षणा प्राचीनैः पञ्चधा विभक्ता -

**'अभिधेयेन सम्बधात् सादृश्यात् समवायतः।**
**वैपरीत्यात् क्रियायोगात् लक्षणा पञ्चधा मता।।'**

अनुमेयार्थस्य प्रतीयमानेन अविनाभावः लोकत एव निर्णीतः इति, न तत्र प्रमाणान्तरापेक्षा। लोके हि दीर्घग्रीवस्य विकटकायस्य दर्शने 'करभः' इति प्रयोगः दृश्यते। तत्र तादृशपुरुषे करभत्वारोपे निमित्तं तत्सादृश्यमेव। एवं 'मञ्चाः क्रोशन्ति' इत्यत्र पुरुषेषु मञ्चत्वारोपे मञ्चेन पुरुषाणां सम्बन्धः (तास्थ्यलक्षणः) निमित्तम्।

किञ्च उपचारवृत्तौ शब्दस्य अर्थान्तरबोधकत्वरूप अतिप्रसङ्गवारणाय किञ्चित् निमित्तमनुसरणीयम्। अन्यथा अन्यत्र प्रसिद्धसम्बन्धः कथमसङ्केतिकमर्थान्तरं न बोधयेत् इति शङ्का समुदियात्। एतादृशशङ्कायाः समाधानार्थमेव अस्माभिः वाच्यस्यार्थस्य अर्थान्तरस्य च लिङ्गलिङ्गिभावः अनुसृतः। लिङ्गाल्लिङ्गिनः प्रतीतिः अनुमानमेवेति न गुणवृत्तौ शाब्दी अर्थान्तरप्रतीतिः इति, द्विरूपायाः अपि लक्षणायाः अनुमानत्वम् शब्दव्यापारत्वं च सिद्धम्।

किञ्च सन्दर्भेऽस्मिन् केचित् अमूल्याः विषयाः सङ्ग्रहश्लोकेषु महिमभट्टेनाविष्कृताः। ध्वनिकारः -

'भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः' इति कथयन् 'वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र, तत्र ध्वनिः उपचारमात्रन्तु भक्तिः' इति भक्तिध्वन्योः विविक्तविषयत्वं प्राह। वस्तुतः अनुपपत्तिप्रतिसन्धानामथवा यत्किञ्चित् निमित्तमास्थाय अविनाभाविनः अर्थान्तरस्य, अर्थात् प्रतीतौ तदेव लक्षणेति अथवा व्यञ्जना वा अनुमानमिति, न ध्वनि-भक्त्योः भिन्नरूपता अपि तु

ऐक्यमेव। एतदेव महिमभट्टेन प्रतिद्वन्द्विवचनेन एवमाविष्कृतम्।

**'भक्त्या बिभर्ति चैकत्वं रूपभेदादयं ध्वनिः।**

**न च नाव्याप्त्यतिव्याप्त्योरभावाल्लक्ष्यते तया।।' (व्यक्ति.पृ.१२३)**

अन्यच्च लक्षणाध्वन्योः अनुमानान्तर्भूतत्वात्, ध्वनेः लक्षणातिरिक्ततयाऽभावात् लावण्यादिपदानि यदा अनुमानस्य आस्पदानि भवन्ति तदा तद्भिन्नध्वनेरपि आस्पदान्येवेति अव्याप्तिदोषः न वक्तुं शक्यते। एतदेव -

**'लावण्याद्याः प्रसक्तास्ते न भवन्ति पदं ध्वनेः' (व्यक्ति.पृ.१२४)**

इत्यत्र काक्त्वा ध्वनेः पदं भवन्त्येव इति प्रतिपादितम्।

किञ्च 'मुख्यां वृत्तिं परित्यज्य' इत्यादि कारिकया ध्वनिकृता तीररूपार्थबोधनविषय इव शैत्यपावनत्वादि प्रयोजनरूपार्थबोधने शब्दस्य स्खलद्गतित्वाभावात् गङ्गाशब्देन लक्षणया शैत्यपावनत्वादिबोधने कर्तुं न शक्यत इति अभ्युपगतम्, किन्तु वास्तविकदृष्ट्या पर्यालोचने लक्ष्यार्थविषयेऽपि शब्दः न स्खलद्गतिः। यतः शब्दस्य स्वार्थबोधनमभिधया जातम्। जाते च स्वार्थबोधे केवलं तस्य समयिव्याहृते घोषादौ अन्वयः कथम् इत्येव प्रश्नः जायते। अयं च प्रश्नः प्रसृतव्यापारमूलकथेवेति क्वास्ति स्खलद्गतित्वम्। एवं शब्दात् वाच्यार्थावगतौ ततः (वाच्यार्थात्) अनुमेयार्थः गङ्गात्वविशिष्टतीरादिः, ततः शैत्यपावनत्वादिश्च अर्थनिष्ठव्यापारेण अनुमानेनैव भवतीति स्खलद्गतिवार्तायाः नास्त्यवकाशः। एवं गुणवृत्तेरर्थनिष्ठव्यापारत्वेन-

**'वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।**

**व्यञ्जकत्वैकमूलस्य ध्वनेः ख्याल्लक्षणं कथम्।।'**

इत्यादि प्रश्नानामपि महिमभट्टेन समाधानानि अभिहितानि आसन् इति शम्।

२.तात्पर्यवृत्तेः अनुमाने अन्तर्भावः :-

तात्पर्यवृत्तिः संसर्गरूपार्थबोधनाय कैश्चित् वाक्यार्थबोधानन्तरकालीन तात्पर्यविषयीभूतार्थ बोधनाय च कैश्चित् स्वीक्रियते। तत्र संसर्गरूपार्थः आकाङ्क्षादिमर्यादयैव भाति इति, न तदर्थं तात्पर्यवृत्तिराश्रीयणीया। किन्तु वाक्यस्थपदबहिर्भूतवक्तृतात्पर्यविषयीभूतार्थे तु तात्पर्यवृत्तिराश्रयणीया इति केचित् मीमांसकाः आशेरते।तन्मतानुसारेण तात्पर्यवृत्तेः आवश्यकता  अस्ति तद्यथा -- 'विषं भक्षय मा चास्य गृहे भुङ्क्थाः' इत्यादौ क्रियमाणं विषभक्षानुज्ञानम् एतद् गृहे भोजनस्य विषभोजनादपि दारुणतरं परिणाममवगमयति। एतच्च तात्पर्यवृत्त्यैवेति मीमांसकानामभिप्रायः। किन्तु अनुमानेनैव अत्र निर्वाहः इति महिमभट्टः। तथाहि न ह्यनुन्मत्तः कश्चित् सुहृदादौ हितकामस्सन् भोजननिषेधं कुर्वाणः अकस्मात् विषभक्षणं अनुजानाति। अतश्च अवगतवक्तृप्रकरणादिस्वरूपः बोद्धा विषभक्षणानुज्ञानादेतद् गृहभोजनस्य अत्यन्तमकरणीयत्वम् अनुमातुमर्हति। तथा चानुमानम् - 'एताद्गृहभोजनं विषाधिककष्टपरिणामि हितेच्छुकर्तृक प्रियजनोस्य विषभक्षणाभ्यनुज्ञानविषयत्वात्'

यन्नैवं तन्नैवम्। ततश्च विषभक्षणाभ्यनुज्ञानस्य साधनभावेन तात्पर्यार्थसाधकत्वात् तात्पर्यार्थोऽपि अनुमेयार्थ एव न पुनः पृथक् भूतः इति शम्।।

३. दीर्घदीर्घतराभिधाव्यापारवादिनां मतस्य खण्डनम् :-

केचित् अभिधाव्यापारस्य दीर्घदीर्घतरव्यापारत्वं स्वीकुर्वाणाः शब्दादेव बहूनां अर्थानां क्रमभावेन प्रतीतिं मेनिरे।

(१) यथा हि - बलवता एकेन धानुष्केन प्रयुज्यमानः बाणः 'शत्रोः 'कवचच्छेदं' 'उरश्च्छेदं' 'मर्मच्छेदं' कृत्वा प्राणानपहरति, न च तस्य वृत्तिभेदः, तथा एक एव सुकविना प्रयुक्तः शब्दः व्यापारभेदं विनैव वाच्यार्थोपक्रमः प्रतीयमानार्थान्तरपर्यवसायी भवतीति शब्दादभिधाव्यापरेणैव क्रमेण अनेकार्थप्रतीतिरिति, शब्दस्य व्यापारान्तराभावेऽपि अर्थान्तरावबोधकत्वम् ऊचिरे।

(२) अन्यच्च 'यत्परः स शब्दार्थः' इति न्यायेन शब्दस्यार्थान्तरतात्पर्यत्त्वे शब्देनैव अर्थान्तरप्रतीतिरिति अन्ये केचिदाहुः। तदुभयमपि अयुक्तमेव। किं शब्दात् अर्थान्तरप्रतीतिः इत्युक्ते साक्षादर्थान्तरप्रतीतिः उतार्थान्तरप्रतीतिद्वारा? नाद्यः। साक्षात् शब्दस्य अर्थान्तरप्रतीतिहेतुत्वासिद्धेः। पारम्पर्येण शब्दस्थार्थान्तरहेतुत्वोपगमे च वस्तूनां हेतुफलभावव्यवहारः न स्यात्। यतो हि कुलालोऽपि सलिलसेकोपकरणभूतं कुम्भं कुर्वन्, मधुमासवत् कुसुमविकासहेतुरिति मुख्यतया ख्यायेत। किञ्च 'यः पुत्रस्य व्यापारः स एव पितुः व्यापारः' इति न मुख्यतया वक्तुं शक्यते। तयोरन्योन्यव्यापारसाङ्कर्यदोषप्रसङ्गात्। एवं शब्दस्य अर्थान्तरबोधकत्वव्यापारोऽपि वक्तुं न शक्यते इति, अर्थस्यैव अर्थान्तरप्रत्यायकत्वं व्यापारः न शब्दस्य।

किञ्च विषमः दृष्टान्तोपन्यासः। न हि यथा सायकः स्वभावत एव एकया वृत्त्या छेद्यभेद्यर्थे प्रवर्तते, तथा शब्दः स्वभावत एव स्वार्थे अर्थान्तरे च प्रवर्तत इति वक्तुं शक्यते। यतो हि शब्दः सङ्केतसापेक्षस्सन् स्वव्यापारामारभते। न तु सायक इव स्वभावतः। ततश्च अभिधेयार्थविषय एव स्वव्यापारः नार्थान्तरविषये, तत्र सङ्केताभावात्। तदभावेऽपि अर्थान्तरस्य प्रतीत्यापत्तिः। तस्मात् शब्दस्य दीर्घदीर्घतराभिधाव्यापारेणार्थान्तरप्रत्यायकत्वं वा 'यत् परः सः शब्दार्थः' इति न्यायेन वा अर्थान्तरप्रत्यायकत्वं न युक्तम्।।

### ३.३. वक्रोक्तिजीवितकारकाव्यलक्षणखण्डनम् :-

अभिधैकव्यापारवादिना कुन्तकेन -

'शब्दार्थौ सहितौ वक्रकविविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।'

इति काव्यसामान्यलक्षणं प्रतिपादितम्। तस्यायमर्थः। वर्णविन्यास वक्र-पदपूर्वार्धवक्रतादि षट्विध वक्रतान्यतमशालिनि तद्विदाह्लादकारिणि बन्धे सहभावेन व्यवस्थितौ, शोभां प्रति परस्परस्पर्धार्थिनौ शब्दार्थौ काव्यमिति काव्यसामान्यलक्षणम् इति कुन्तकस्याभिप्रायः। तत्र वक्रत्वं नाम

शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकित्वम्। तच्च काव्यस्य जीवितमिति, महिमभट्टदिशा सहृदयमानिनां तेषामाशयः। तत्र प्रसिद्धोपनिबन्धनव्यतिरेकित्वं किं शब्दार्थयोः औचित्यमात्रपर्यवसायि अहोस्वित् प्रसिद्धप्रस्थानव्यतिरेकिणः शब्दार्थोपनिबन्धनवैचित्र्यस्य प्रकारान्तरासम्भवात्, तत्र अद्यः पक्षः न शोभनः। काव्यस्वरूपनिरूपणसामर्थ्यसिद्धस्य तस्य (औचित्यस्य) पक्षः न शोभनः। ते च यथा शास्त्रमुपनिबध्यमानाः विभावादयः रसाभिव्यक्तेः कारणभावं भजन्ते। रसात्मकं च वाक्यं काव्यम्। अतः कुतस्तत्र अनौचित्यसंस्पर्शः। तदभावे च तन्निरासार्थं काव्यलक्षणे तादृशं वक्रत्वं न निवेशनीयम्। अथ वक्रत्वं प्रसिद्धाभिधेयव्यतिरेकि प्रतीयमानार्थपरम् इति यद्युच्यते, तर्हि ध्वनेरेव इदं लक्षणम् अनया भङ्ग्याभिहितं भवति। वक्रतायाः ध्वनेश्च अभिन्नत्वात्। अत एव कुन्तकेन प्रायशः ध्वनिप्रभेदा एव स्वालङ्कारशास्त्रनिबन्धने उदाहृताः। यदि वक्रत्वं ध्वनिपर्यवसायि, तर्हि शब्दस्यार्थप्रकाशने अभिधा एक एव व्यापार इति, शब्दात् न अनुमेयरूपः ध्वनिः अपि तु शब्दवाच्यादेव अर्थान्तरप्रतीतिः। सा च अविनाभावसम्बन्धनिश्चयपूर्विका अनुमान एवान्तर्भवतीति वक्रताघटितकुन्तककाव्यलक्षणमपि नानुमानप्रस्थानात् अतिरिच्यत इति शम्।।

## ३.४. शब्दस्य व्यञ्जकत्वाभावनिरूपणम् - अर्थस्यैव तन्निरूपणम् :-

शब्दस्य अभिधातिरिक्तः व्यापारः न सम्भवतीति, अर्थान्तरप्रत्यायनाय व्यञ्जकत्वलक्षणः व्यापारोऽपि अनुपपन्न एव। व्यक्तेः त्रिविधायाः पूर्वोक्तरीत्यानुपपत्तेः, सम्बन्धान्तरस्य चानुपपत्तेः। यदि सम्बन्धं विनापि शब्दस्यार्थान्तरं प्रति व्यञ्जकत्वं स्वीक्रियेत तर्हि अयमेव व्यङ्ग्यार्थः स्वीकर्तव्यः इति नियमो न स्यात्। असम्बद्धतया बहूनि व्यङ्ग्यानि स्फुरेयुः। न च गेयस्य शब्दस्य रत्यादिभिरिव काव्यशब्दस्य रत्याभिः स्वाभाविकः सम्बन्धो युज्यते, आपामरं गेयादिव काव्यात् रसस्फूर्तिप्रसङ्गात्। नापि समयकृतं शब्दस्यार्थान्तरव्यञ्जकत्वं, व्यञ्जकत्वस्य औपाधिकव्यापारत्वेन ध्वनिकारेणाप्यङ्गीकृतत्वात्। यथाह – ध्वनिकारः शब्दार्थयोरपि ..... (व्यक्ति.पृ.१४८) इत्यादि गन्थेन औपाधिकत्वस्य प्रतिपादनात्, उपाधीनां च अर्थप्रकरणादि सामग्रीरूपाणां आनन्त्यात् अनियतत्वाच्य प्रतिपदं शब्दानुशासनस्यैव कर्तुमशक्यत्वात्।

तथा हि एक एव रामशब्दः 'रामोऽस्मि सर्वं सहे' इत्यत्र दुस्सहजनकसुताविर-हविसंष्ठुलेऽपि समये निरपत्रपतिप्राणपरिरक्षणवैचक्षण्यलक्षणं किमपि रामगतं क्रौर्यातिशयं प्रकाशयति। तत्र च वैदेहिगत कारुण्यदृष्टिप्रदर्शनसन्दर्भ एव निदानम्। एवं 'रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्' इत्यादिसन्दर्भे असमसाहसरसत्व-सत्यसन्धत्वादिकं गम्यते। न च पूर्वोक्तप्रयोगेषु सामग्री वैचित्र्यात् एक एव शब्दः अर्थान्तरं अभिव्यञ्जयेदिति वाच्यम्। सामग्री सहकृतशब्दात् अर्थान्तराभिव्यक्तिर्वा? केवलसामग्र्या अर्थान्तराभिव्यक्तिर्वा इति विकल्पे प्रसक्ते केवलसामग्र्या एव अभिव्यञ्जकत्वोपपत्तौ शब्दस्य व्यञ्जकत्वकल्पनं व्यर्थम्। सामग्र्याः अभिव्यञ्जकत्वपक्षे स्वीकृते तु अर्थस्य व्यञ्जकत्वात् नास्ति विशेषः इति शब्दस्य व्यञ्जकत्वमसिद्धमेव।।

## ३ .५ . प्रादीनां वाचकत्वविचारः :-

एवमुपर्युक्तदिशा केवलशब्दस्य व्यञ्जकत्वे निराकृते प्रादीनामुपसर्गाणामपि व्यञ्जकत्वाभावात्, प्राप्तमित्यादौ प्रादीनां द्योतकत्वं न स्यात्। अपि तु वाचकत्वमेव। द्योतकत्वं प्रकाशकत्वं व्यञ्जकत्वमिति सर्वमपि एकमेव। द्योतकत्वं नाम स्वसमयिव्याहृतपदनिष्ठवृत्युन्नायकत्वम्। तच्च प्रादिविषये शाब्दिकाः आस् धातोरेव
उपासनाद्यर्थबोधकस्य कर्मप्रत्ययसम्बन्धं प्रथमत उक्त्वा धातोः विशेषार्थद्योतकेन 'उप' इति उपसर्गेण सम्बन्धं स्वीकृत्य 'उपास्यते गुरुः' इत्यादि प्रयोगं समर्थयन्ति। अन्यथा उपसर्गाणां वाचकत्वे धातुना केवलमकर्मकमेवोक्तेति तस्य कर्मप्रत्ययेन योगो न स्यात् इति शाब्दिकाः आशेरते। किञ्च महिमभट्टेनापि वाचकत्वपक्षे एका अनुपपत्तिः अत्र निरूपिता। यदि उपसर्गाणां द्योतकत्वं न स्वीक्रियते, अपि तु वाचतकत्वमेव, तर्हि प्राप्तमित्यादौ प्रा, आप् इति द्वयोरपि धातूपसर्गयोः अर्थवाचकत्वेन प्राप् इति विशिष्टस्य धातुत्वात् हलादित्वाच्च 'धातोरेकाचो हलादेः क्रियासमभिव्यवहारे यङ्' इति धातोः यङ् प्रसङ्गः। एतद् दोषवारणाय आप् धातोरेव प्राप्तिरूपार्थकत्वं स्वीकृत्य 'प्र' इति उपसर्गस्य द्योतकत्वे स्वीकृते धातोः हलादित्वाभावात् यङ् वार्यते इति चेत् सत्यम् एतेषामुपसर्गाणां व्यञ्जकत्वमङ्गीकर्तव्यम्। परं प्रदीपनिष्ठस्य वास्तवस्य व्यञ्जकत्वस्य शब्दार्थविषये अभावात् एतद् व्यञ्जकत्वम् अथवा द्योतकत्वं प्रादिशब्देषु औपचारिकरुपैणैव स्वीकार्यम्। एवञ्च यङापत्त्यादिदोषवारणात्मक-शास्त्रप्रक्रियानिर्वाहः। अतः औपचारिकमेव तत् द्योतकत्वं न मुख्यम्।

ननु मुख्यमेव द्योतकत्वं प्रतिपाद्यते चेत्, को दोषः पचत्यादयः क्रियासामान्यवचनाः। सामान्यानि च गर्भीकृताशेष विशेषाणि। अतः 'निर्विशेषं न सामान्यं भवेत् शशविषाणवत्' इत्युक्तदिशा केवलसामर्थ्यसिद्धोऽपि विशेषः द्योतकमपेक्षत इति प्रादयः द्योतका एव भवितुमर्हन्ति न वाचका इति चेत्।

अत्रोच्यते - यदप्रतीतौ सामान्यप्रतीतिरेव न पर्यवस्यति, तद्विशेषमात्रं तेभ्यः प्रतीयतां नाम न तु तावता व्यवहारसिद्धिः काचित्। व्यवहारसिद्धौ हि प्रतिनियतो विशेषः अपेक्षते, न तु विशेषसामान्यम्। तादृशप्रतिनियतविशेषश्च प्रादिभ्य एव भवति, न पचत्यादिभ्यः। एवञ्च अन्वयव्यतिरेकाभ्यां प्रादीनां वाचकत्वं वक्तव्यम्। तस्मात् यत्प्रयोगान्वयव्यतिरेकानुविधायिनी यस्य प्रतीतिः तयोः वाच्यवाचकभावव्यवहार विषयत्वमेवोपगन्तुं शक्यमिति नाभिव्यक्तिविषयत्वम्। यथा घटशब्दतदर्थयोः। एवं प्रादिप्रयोगान्वयव्यतिरेकानुविधायिनी पचतीत्यादौ प्रकर्षप्रतीतिरिति तेऽपि प्रादयः मुख्यतया वाचका एव। यदि च प्रादीनां द्योतकत्वं स्वीक्रियते, तर्हि नीलोत्पलादौ सर्वस्यैव विशेषणाभिमतस्य नीलादिशब्दस्य विशेष्यवाचिनः उत्पलादेः शब्दस्य च विशेषणविशेष्यभावव्यवहारो न स्यात्। उत्पलादिनैव गर्भीकृतसर्वसामान्येन विशेषपर्यवसायिना उत्पलविशेषस्य प्रतिपादने नीलशब्दस्य प्रादिन्यायेन द्योतकतापत्तेः। एवमन्तर्मात्रविपरिवर्तितया सिद्धसद्भावानां घटादीनामपि घटादयः द्योतका एव भवन्तीति, वाच्यवाचकव्यवहारः अस्तं गच्छेत्। तस्मात् भाक्तमेव द्योतकत्वमभ्युपगन्तव्यं न मुख्यम्।

भक्तेश्च प्रयोजनं वाच्यार्थस्य स्फुटत्वप्रतिपत्तिरेव। तथा उपसर्गाणां द्योतकाभ्युपगमे निमित्तं तु विशेषणविशेष्यप्रतीत्योः आशुभावितया क्रमानुपलक्षणात् सहभावप्रतीतिरेव। विशेषणं हि द्विविधम् अन्तरङ्गं बहिरङ्गं चेति। तत्र आद्यं स्फटिकादेः लाक्षादिवत् अव्यवहितमेव विशेषणतां भजते। गवादौ गोत्वादिकमपि विशेष्यस्वरूपान्तर्भूतमिव अस्ति। अतः तत् अन्तरङ्गविशेषणम्। यद्यपि तत्र जातिव्यक्तिप्रतीत्योः क्रमभावः अस्ति, तथापि तस्यानुपपलक्षणात् सहभावावगमः। स च द्योत्यद्योतकभाव भ्रमहेतुः। एवं प्रादीनां द्योतकताभ्रममनुभवन्त इव केचित् उपसर्गाणां धात्वान्तर्भावमिव मन्यमानाः केवलमडादीनां व्यवस्थार्थमेव उपसर्गान् पृथक्त्वेन उपाकल्पयन्। किन्तु धातूपसर्गयोः मध्ये धातुरेव गर्भीकृत प्राद्यर्थक्रियाबोधकः इति केचित् ऊचिरे। बहिरङ्गविशेषणत्वं तु लोहं प्रति अयस्कान्तस्येव बोध्यम्। तद्धि व्यवहितमपि लोहे स्वामिशक्तिमादधात्येव। बहिरङ्गविशेषणं च समानाधिकरणं भिन्नाधिकरणं चेति द्विविधम्। विशेष्योऽपि धात्वर्थो नामार्थश्चेति द्विविधः। उपसर्गाणां विषये धात्वर्थः नामार्थः इत्युभयमपि विशेषणम्। एतेषां विशेष्यात् पूर्वं पश्चात्याव्यवधानेनैव उपयोगः कर्तव्यः, न व्यवधानेन। यद्यपि निपातानां दूरतः प्रयोगः क्रियते, अथापि सन्निहितयोजनया अर्थप्रतीतिः भवितुमर्हति। किन्तु रसप्रतीतेः विलम्बो भवति। एवं च शाब्दिकमपि अनौचित्यं तत्र दोषः स्यात्। उक्तं च 'अनौचित्यात् ऋते नान्यत् रसभङ्गस्य कारणम् इति।।'

**३.६.ध्वनिगुणीभूतव्यङ्ग्यभेदात्मना व्यङ्ग्य भेदानुपपत्तिः :-**

ध्वनिकारेण व्यङ्ग्यस्य प्राधान्ये ध्नविरिति व्यङ्ग्यस्याप्राधान्ये गुणीभूतव्यङ्ग्यमिति प्रभेदद्वयं प्रत्यपादि। वस्तुतः महिमभट्टानुसारेण एतादृशप्रभेदपरिगणनायां उपपत्तिः न दृश्यते। यतः काव्यस्य स्वरूपं व्युप्तादयितुकामेन मतिमता तल्लक्षणमेव सामान्येन आख्यातव्यम्। तत् यथा-यत्र वाच्यप्रतीयमानयोः गम्यगमकभावसंस्पर्शः तत्काव्यमिति, तावतैव व्युत्पत्तिसिद्धेः। यत्तु तथा अनाख्याय तयोः प्राधान्याप्राधान्यभावपरिकल्पनेन भेदद्वयमुक्तं, तदप्रयोजकमेव। यो हि यद्विशेषप्रतीतौ निमित्तभावेन निश्चितः स एव तदर्थिनः प्रतिपाद्यः नान्यः। यथा पुरुषविशेषात्मकस्य दण्डिनः प्रतीतौ दण्डः निमित्तं भवतीति, तादृशदण्डिप्रतीतिं प्रति दण्ड एव उपायतया वक्तव्यः। प्रकृते चारुत्वविशिष्टार्थप्रतीतौ अनुमेयार्थसंस्पर्शमात्रं निमित्ततया निश्चितमिति वाच्यप्रतीयमानयोः गम्यगमकभावसंस्पर्श एव काव्यलक्षणे वक्तव्यः, न ततः अतिरिक्तः प्राधान्याप्राधान्यकृतः विशेषः कश्चित्। नहि प्रतीयमानार्थस्य प्राधान्ये अप्राधान्ये च चमत्कारे कश्चित् विशेषोऽस्ति। अतः एतादृश काव्यभेदपरिकल्पना व्यर्थैव इति महिमभट्टस्याशयः। अयमेव अभिप्रायः सोदाहरणमेवं महिम्ना प्रदर्शितः। तथाहि -

**'व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि।**
**मा तवापि तया विना दाक्षिण्यहतस्य जनिषत्।।' (व्यक्ति.पृ.१६१)**

इत्यत्र 'सदा मम सन्निधौ एव उपस्थितो भव' इति व्यङ्ग्यस्यार्थस्य प्राधान्येन प्रतीतौ वा,

**'अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः।**
**अहो दैवगतिश्चित्रा तथापि न समागमः।।'**

इति पद्ये परस्परमेलनरहितसन्ध्या दिवसवृत्तान्तं प्रति 'परस्पर समागमोत्सुकयोरपि नायकयोः समागमाभावात्मकस्य व्यङ्ग्यस्य वस्तुनः उपस्कारकत्वेन अप्राधान्येन प्रतीतौ वा नास्ति चमत्कारकृतः कश्चित् विशेषः। एवं 'वीराणां रमते घृसृणारुणे न तथा प्रियास्तनोत्सङ्गे।

दृष्टी रिपुगजकुम्भस्थले यथा बहुलसिन्दूरे।।' (व्यक्ति.पृ.१६३)

इति पद्ये 'वीराणां दृष्टिः प्रियास्तनोत्सङ्गापेक्षया रिपुगजकुम्भस्थले रमते' इति कथनात् उपमानप्रियास्तनोत्सङ्गापेक्षया उपमेये गजकुम्भस्थले वैधर्म्यस्य प्राधान्येन अवगते, व्यतिरेकालङ्कारः ध्वनिः। एवं –

'चन्द्रमयूखैर्निशा नलिनी कमलैः कुसुमगच्छैर्लता।
हंसैः शारदशोभा काव्यकथा सज्जनैः क्रियते गुर्वी।।'

इति पद्ये तु निशानलिनीलता-शारदशोभा-काव्यकथानां चन्द्रमयूख-कमल-कुसुमगुच्छ-हंस-सज्जनैः यथाक्रमं गुरुत्वेन सम्पादनस्य वर्णनात्, तत्र गुरुत्वेन करणं सर्वेषां साधर्म्यतया दीपकम्। तेन गुरुत्वेन कारणेन चन्द्रमयूखादीनां निशादीनां च पारस्परिकः उपमानोपमोयो भावः व्यज्यते इति यद्यप्यत्र उपमालङ्कारस्य व्यङ्ग्यता, तथापि वाच्यस्य दीपकस्य व्यङ्ग्यभूतायाम् उपमायां तात्पर्याभावात् व्यङ्ग्योपमायाः गुणीभूतव्यङ्ग्यत्वमेव न ध्वनित्वमिति ध्वनिकारादीनां आशयः।

किन्तु महिमभट्टः अत्र अभिप्रैति यत् 'वीराणां रमते' इत्यादिपूर्वपद्ये व्यतिरेकस्य प्राधान्येन व्यङ्ग्यत्वे वा 'चन्द्रमयूखैर्निशा' इत्यादि पद्ये उपमायाः अप्राधान्येन व्यङ्ग्यत्वे वा व्यङ्ग्यस्य प्राधान्याप्राधान्यकृतं चमत्कारतारतम्यं किञ्चित् नानुभूयते, किन्तु उभयत्रापि प्रतीयमानार्थकृतचमत्कारः अविशेष एव इति बोध्यम्।

एवं कुमारसम्भवे वसन्तऋतुर्वर्णनसन्दर्भे वसन्तपुष्पाभरणं वहन्त्याः देव्याः अगमनवर्णने मन्मथशरसन्धानवर्णनपर्यन्ते –

'विवर्णभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या।।'

'प्रतिग्रहीतुं प्रणयप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च।
समोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्।।'

इति पद्ययोः प्रथमपद्ये सम्पूर्णालम्बनस्वभावं उपवर्ण्य, द्वितीयपद्ये मन्मथकर्तृकधनुर्ग्रहणात्मकः उद्धीपनविभावः वर्णितः। ततः 'हरस्तु किञ्चित् परिलुप्तधैर्यः' इति प्रसिद्धपद्ये भगवतः शिवस्य पार्वतीबिम्बधरविषयः विलोचनव्यापारः उपवर्णितः। स च अनुभावात्मकः। एवं विभावानुभावाभ्यां पार्वतीविषयकः परमेश्वरनिष्ठः शृङ्गारः अत्र प्राधान्येन अभिव्यक्तः। न हि एतादृशस्थलापेक्षया 'किं हास्येन न मे प्रयास्यसि ......(व्यक्ति.पृ.४६६) इत्यादि शुद्ध करुणस्य अङ्गतया अभिव्यक्तिस्थले वा, 'क्षिप्तोहस्तावलग्नः' इत्यादिप्रसिद्धपद्ये त्रिपुररिपुप्रभावातिशयं प्रति ईर्ष्याविप्रलम्भस्य श्लेषसहितस्य

अङ्गतया अभिव्यक्तिस्थले वा प्राधान्याप्राधान्य कृतं चमत्कारतारतम्यं किञ्चित् दृश्यते। यतः सर्वत्र प्रतीयमानसंस्पर्शेनैव सौभाग्यम्। ध्वनिकारेणापि एतदुक्तम् 'सर्वदा नास्त्येव हृदयहारिणः काव्यस्य स प्रकारः यत्र प्रतीयमानार्थसंस्पर्शेन नास्ति सौभाग्यम्।'

अन्यच्च 'प्रतीयमानच्छाया एषा सुन्दरीणां लज्जा इव काव्यस्य भूषणम्' इति सन्दर्भान्तरे च उद्घाटितम्। तस्मात् प्रतीयमानछायया काव्यस्य एकविधत्वमेवेति न व्यङ्ग्स्य प्राधान्याप्राधान्यकृतविभागो युक्तः। यदि वा एतत् सम्भवतीति भावना क्रियेत, तर्हि पदवर्णसङ्खादिप्रयुक्तव्यङ्ग्यविभागः अपि कर्तव्यो भवेत्। यदि च एतादृशविशेष एव प्राधान्यरूपः ध्वनिरिति काव्यस्य व्यपदेशः क्रियते, तर्हि संज्ञा संज्ञाभावव्युत्पत्ति फलमेतत् पर्यवस्तीति काव्यविशेषमात्रता प्रकटिता इति शम्।।

**३ .७ .अविवक्षितवाच्य-विवक्षितान्यपरवाच्ययोः ध्वनिप्रकारत्व अनुपपत्तिः :-**

**स्वावलोकनप्रश्नाः**

१.अविवक्षितवाच्यध्वनेः नामान्तरं लिखत।

..........................................................................................

२.विवक्षितान्यपरवाच्यध्वनेः नामान्तरं विलिख्य उदाहरणेन योजयत।

..........................................................................................

ध्वनिकारैः अविवक्षितवाच्य-विविक्षातान्यपरवाच्यत्वभेदेन ध्वनेः प्रकारद्वयं उक्तम्। तत्र अविवक्षितवाच्यध्वनिः इत्यत्र अविवक्षितवाच्यत्वं नाम किं अविवक्षितत्वं अनुपादेयत्वम् उत अन्यपरत्वम्। अनुपादेयत्वेऽपि किं सर्वात्मना अनुपादेयत्वम्? उत अंशतः अनुपादेयत्वम्? तत्र प्रथमविकल्पे नाद्यः। सर्वात्मना वाच्यस्य अनुपादयत्वे वाक्यनिष्ठं व्यञ्जकत्वमपि अनुपादेयं प्रसज्येत। व्यञ्जकत्वस्य वाच्याश्रितत्वात्, तस्य च सर्वात्मना अनुपादेयत्वात्। एवञ्च पुनरुक्तादेः उपादानं यथा नोचितं, एवं सर्वात्मना अनुपादेयस्य वाच्यस्य व्यञ्जकत्वासम्भवात् अविवक्षितवाच्यध्वनिः इति प्रयोगोऽपि दुष्ट एव स्यात्।

न च प्रथमे द्वितीयः कल्पः। यदि अंशेन अनुपादेयत्वम् अविवक्षितत्वम्, तर्हि अविवक्षितः अंशः को वा इति स्पष्टी कर्तव्यम्। स च निरूप्यमाणः स्वाप्राधान्य एव पर्यवस्यतीति अविवक्षितत्वम् अन्यपरत्वम् उपसर्जनीकृतार्थत्वम् च एकमेव अनया व्यञ्जनया ध्वनेरेव स्वरूपम् आविष्कृतम्, न तस्य प्रकारभेदः। यस्य हि सामान्यलक्षणस्य प्रकारान्तरं अवान्तरविशेषसंस्पर्शः स तस्य प्रकार इति वक्तव्यम्। यथा गोत्वस्य शाबलत्वादि न तु तस्यैव स एव प्रकारो भवितुमर्हति। तथा च विशेषसंस्पर्शाभावात् ध्वनिप्रकारत्वं निरुक्तम्। अयमेव दोषः अन्यपरत्वमविवक्षितत्वमिति द्वितीयपक्षेऽपि प्रसरति।

**स्वावलोकनप्रश्नाः**

१.विवक्षितः वाच्योऽर्थः न प्रधानः,व्यङ्ग्यार्थः प्रधानः इति कथनं किं स्वरूपं स्मारयति।

.......................................................................................................

.......................................................................................................

एवं विवक्षितान्यपरवाच्यत्व नामकरणमपि न युज्यते। तथाहि तत्र विवक्षितत्वं प्राधान्यं इत्युच्यते, तर्हि कथं प्राधान्यस्य वाच्यस्य अन्यपरत्वम्? अन्यपरत्वं नाम अङ्गभावः इति भण्यते। यस्य च अङ्गभावः तस्यैव विवक्षितत्वात् प्राधान्यं कथं उपपद्यते। अतश्च वाच्यस्य विवक्षितत्वे अन्यपरत्वं अन्यपरत्वे च विवक्षितत्वं नोपपद्यते। यद्यपि अन्यस्य विशेषणभूते पदार्थे अन्यविशेषाधायकत्वेन प्राधान्यम्, अन्यस्य विषये उपसर्जनीभावेन अप्राधान्यं च अस्तु नाम। किन्तु वाच्यार्थेउवाक्यार्थे प्राधान्यमप्राधान्यं चेति विरुद्धधर्मद्वयमसङ्गतमेव। किञ्च विवक्षितान्यपरवाच्ये अन्यपरत्वस्य ध्वनित्वादेव सिद्धेः पुनः अन्य परत्वनिवेशनं व्यर्थम्। अथ प्रसिद्धमपि अन्यपरत्वं पुनः, ध्वनिप्रभेदे यदि निवेश्यते, तर्हि अविवक्षितवाच्यध्वनावपि अन्यपरत्वमुपादीयताम् यदि तत्र नोपदीयत इत्युच्यते, तर्हि अत्रापि मास्तु।

किञ्च अर्थान्तरसङ्क्रमितवाच्यस्य यदुदाहरणं तत् 'अग्निः माणवकः' इतिवत् गुणावृत्तेरेव सङ्गच्छते। तस्य गुणवृत्तिप्रकारत्वसमर्थनात्। 'रामोऽस्मि सर्वं सहे' इत्यादौ अर्थान्तरबोधकः किं प्रकरणादिसहकृतशब्दः, अहोस्वित् प्रकरणादिरेव इति सन्देहे प्रकरणादेरेव अर्थान्तरावगतेः शब्दाच्च अर्थान्तरावगत्यभावात् सोऽपि भेदः गुणवृत्तावेव अन्तर्भवति। अत्यन्ततिरस्कृतवाच्यस्तु 'गौर्वाहीकः' इतिवत् पदार्थोपचार एव इति, तस्यापि अनुमानान्तर्भावः साधित एव। शब्दशक्तिर्मूलध्वनिस्तु न सम्भवत्येव शब्दस्य अभिधा व्यतिरेकेण शक्त्यन्तराभावात् इति शम्।।

**व्यक्तिविवेकः -- तृतीयखण्डप्रश्नाः**

१. शब्दस्य अभिधा एक एव व्यापार इति महिमभट्टदिशा निरूपयत।
२. लक्षणायाः अनुमानेऽन्तर्भावं दर्शयत।
३. तात्पर्यवृत्तिम् अनुमानेऽन्तर्गमयत।
४. अभिधायाः एव दीर्घदीर्घतरव्यापारवत्त्वं खण्डयत।
५. कुन्तकस्य काव्यलक्षणं महिमभट्टरीत्या खण्डयत।
६. प्रादीनां वाचकत्त्वं वा द्योतकत्त्वं वेति विचारयत।
७. ध्वनिगुणीभूतव्यङ्ग्यभेदौ निराकुरुत।
८. 'अविवक्षितवाच्यविवक्षितान्यपरवाच्यौ ध्वनिभेदौ अनुपपन्नौ' निरूपयत।

***